

This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.

+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.

+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.


+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at `http://books.google.com/`

A. Or.
4280

A. c. 4280



BIBLIOTHECA REGIA MONACENSIS.

Digitized by Google

Digitized by Google

Digitized by Google

MÁLATI AND MÁDHAVA:

A DRAMA,

IN TEN ACTS.

BY

BHAVABHÚTI.

With a Commentary,

EXPLANATORY OF THE PRÁKRIT PASSAGES.

PUBLISHED UNDER THE AUTHORITY OF THE COMMITTEE OF PUBLIC INSTRUCTION.

Calcutta:

PRINTED AT THE EDUCATION PRESS, CIRCULAR ROAD; AND SOLD AT THE DEPOSITORY, PATALDANGA.

1830.

19. D.

Digitized by Google

BIBLIOTHECA
REGIA
MONACENSIS.

Digitized by Google

॥ मालतीमाधवं ॥

श्रीभवभूतिमहाकविविरचितं ।

साधारणविद्यावृद्ध्यर्थकसमाजाधिपतीनामाज्ञया

कलिकातानगरीस्थ-इडुकेशनयन्त्रालये

प्राकृतभाषाव्याख्यासहितं

मुद्रितमभूत् ।

१८६०

Digitized by Google

Digitized by Google

॥ मालतीमाधवं ॥

॥ प्रकरणं ॥

॥ प्रथमाङ्कः ॥

॥ नान्दी ॥

यानन्दं नन्दिहस्ताहतमरजरवाहूतकौमारवर्हि
यास्याक्षायरम्भं विग्रति फणिपतौ भोगभंगोचभाजि,
मध्योड्डीनाग्निधूमाकुलितककुभखाण्डवे भूतपाणे
र्वैमायक्षस्थिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः।

अपिच।

चूडायीडकपालसंकुलगलन्मन्दाकिनीवारयो
विद्युन्मायलसाटलोचनपुटज्योतिर्विभिन्नत्रिषः,
पान्तु त्रासकठोरकेतकनिशासन्दिग्धमुग्धेन्दवो
भूतेशस्य भुजङ्गवल्लिवलयस्वङ्कृजुटाजटाः।

अपिच।

पक्षाक्षीपिङ्गलिषः कृष्ण इव तडितां पक्ष इतस्ततः समूहो,
यस्मिन् ब्रह्माण्डनीपद्विघटितमुकुले कालयक्षा जुहाव;
अर्चिर्निष्टप्तचूडामणिगलितसुधासारसंहारिकोणं
तार्क्षीयीकं पुरारेस्तदवतु मदनोच्छेदवैचित्र्यं वः।

Digitized by Google

॥ नान्द्यन्ते सूत्रधारः ॥

अलमतिविस्तरेण ॥ पुरतोऽवलोक्य ॥ अये उदितभूयिष्ठ एष भगवानशेषभुवनदीपदीपकल्पनस्तमुपतिष्ठे ॥ प्रणम्य ॥

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्त्ते,
धुर्य्यां लक्ष्मीमथ मयि भृशं धेहि, देव, प्रसीद ;
यद्यत्पापं प्रतिजहि, जगन्नाथ, नम्रस्य तन्मे
भद्रं भद्रं वितर, भगवन्, भूयसे मङ्गलाय ।

॥ नेपथ्याभिमुखमवलोक्य ॥ भारिष ; सुविहितानि रङ्गमङ्गलानि, यस्मिन्पतितस्य भगवतः कालप्रियनाथस्य याचाप्रसङ्गेन नानादिगन्तवास्तव्योमहाजनसमाजः ; आदिष्टस्मि विदग्धविदग्धजनपरिषदा, यथा, केनचिदपूर्व्वप्रकरणेन वयं विनोदयितव्या इति । तत्किमित्युदास्यते भरताः ?

॥ प्रविश्य पारिपार्श्विकः ॥ भाव, परिषन्निर्दिष्टगुणं प्रबन्धं नाधिगच्छामः ।

सूच । भारिष, कतमे ते गुणास्तच्च यानुदाहरन्त्यार्य्या विदग्धामिश्रा, भगवन्तो, भूमिदेवाश्च ।

नटः ।

भूम्ना रसानां, गहनाः प्रयोगाः, सौहार्द्दश्लक्ष्णानि विचेष्टितानि ।
औद्धत्यमायोजितकामसूत्रं, चिन्ताः कथा, वापि विदग्धता च ।

सूच । स्मृतं तर्हि ।

नटः । भाव, किमिव ?

Digitized by Google

सूत्र। अस्ति दक्षिणापथेषु पद्मनगरं नाम नगरं; तत्र केचित्तैत्तिरीयिणः काश्यपास्वरणगुरवः पद्मिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिनोऽम्बरनामानो ब्राह्मणा, ब्रह्मवादिनः, प्रतिवसन्ति स्म।

ते श्रोत्रियास्तत्वविनिश्चयाय भूरि श्रुतं शाश्वतमाद्रियन्ते, दृष्टाय पूर्त्ताय च कर्म्मणेऽर्थान्, दारानपत्याय, तपोऽर्थमायुः।

तदामुष्यायणस्य तत्रभवतः सुगृहीतनाम्नो, भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवो, भट्ट श्रीकण्ठपदलाञ्छनो, भवभूतिनामा, जातूकर्णीपुत्रः, कविर्निसर्गसौहृदेन भरतेषुवर्त्तमानः, स्वकृतिमेवंप्रायगुणभूयसीमस्माकमर्पितवान्, यत्र खल्वियं वाचो युक्तिः।

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां,
जानन्ति ते किमपि तान् प्रति नैष यत्नः
उत्पत्स्यते ऽस्ति मम कोऽपि समानधर्म्मा,
कालोह्ययं निरवधिर्विपुला च पृथ्वी।

अपिच।

यदेदाध्ययनं, तथोपनिषदां, सांख्यस्य, योगस्य च,
ज्ञानं, तत्कथनेन, किं न हि ततः कश्चिद्गुणोनाटके।
यत्प्रौढत्वमुदारता च वचसां, यच्चार्थतोगौरवं,
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः।

Digitized by Google

अतो, यदस्माकमर्पितं प्रियसुहृदाऽत्रभवता भवभूतिनाम्ना, प्रकरणं, खण्डितमालतीमाधवं नाम, तदेतदेव तत्रभवतः काल प्रियनाम्नश्च पुरतः प्रयोगेण प्रख्यापयितुमुद्यताः। तत्सर्व्वे कुशीलवाः संगीतप्रयोगेण मत्समीहितसंपादनाय प्रवर्त्तन्तां।

नटः॥ सृत्वा॥ एवं क्रियते युष्मदादेशः किन्तु या यस्य युज्यते भूमिका, तां खलु तथैव भावेन सर्व्वे वर्य्याः पाठिताः, सौगत परिव्राजिकायास्तु कामन्दक्याः प्रथमभूमिकां भावएवाधीते, तदन्येवाभिन्यास्तदवलोकितायाः।

सूत्र। ततः किं।

नटः। ततः प्रकरणनायकस्य मालतीवल्लभस्य माधवस्य वर्णिकापरिग्रहः कथं?

सूत्र। मकरन्दकलहंसप्रवेशावसरे तत्सुविहितं।

नटः। तर्हि तत्प्रतिबद्धप्रयोगादेवात्रभवतः सामाजिका नुपालप्स्यन्ते।

सूत्र। वाढं, एषोऽस्मि कामन्दकी संवृत्तः।

नटः। अहमप्यवलोकिता॥ इति परिक्रम्य निष्क्रान्ता॥

॥ प्रस्तावना॥ ततः परिवृत्य रङ्गपीठिका नेपथ्ये उपविष्टे, कामन्दक्यवलोकिते प्रविशतः॥

कामन्दकी। वत्से अवलोकिते!

अवलोकिता। आणवेदु भअवदी।

Digitized by Google

काम। अपि नाम, तयोः कल्याणिनोर्भूरिवसुदेवरातापत्य योर्मालतीमाधवयोरभिमतः पाणिग्रहः स्यात्॥ वामाक्षि स्पन्दनं सूचयिता सहर्षं॥

विहसतेव कटाक्षणमान्तरेण चक्षुषा,
स्फुरता वामकेनापि दाक्षिण्यमवलम्ब्यते।

अव। महन्तो खु भअवदीए एसो चित्तविक्खेवो। अच्छरीअं, अच्छरीअं, जं दाणीं वीरचीवरपरिच्छदं णिच्चवाद मेत्तपाणअन्तीं भअवदीं, दीहिसे आआसे, अमच्चभूरिवसु णिओएदि। तहिं, उक्खण्डिदसंसारावग्गहो अप्पा तुम्हेहिं णिउज्जिवीअदि (१)।

कामं। वत्से, मा मैवं ब्रूहि।

यस्यां विधेय विषये स भवानियुंक्ते,
स्नेहस्य तत्फलमसौ प्रणयस्य सारः।
प्राणैस्तपोभिरथवाभिमतं मदीयैः,
कृत्यं घटेत सुहृदो, यदि तत्कृतं स्यात्।

---

(१) महान् खलु भगवत्याएष चित्तविक्षेपः। आश्चर्यं. आश्चर्यं, यदिदानीं वीरचीवरमात्रपरिच्छदां भगवतीमीदृशे आयासे अमात्यभूरिवसुर्नियोजयति। तच, उत्खण्डितसंसारावग्रहआत्मा युष्माभिर्नियुज्यते।

Digitized by Google

अयि, किं न वेत्सि; एकत्र नो विद्यापरिग्रहाय नानादिगन्त वासिनां साहचर्य्यमासीत्; तदैव चास्मत्सौदामिनीसमक्षमनयो र्भूरिवसुदेवरातयोर्दत्तेयं प्रतिज्ञा, अवश्यमावाभ्यामपत्य सम्बन्धः कर्त्तव्यइति। तदिदानीं विदर्भराजमन्त्रिणा सता देवरातेन, माधवं पुत्रमान्वीक्षिकीश्रवणाय, कुण्डिनपुरादिमां पद्मावतीं प्रहिणता सुविहितं।

अपत्यसम्बन्धविधिप्रतिज्ञा प्रियस्य नीता सुहृदः स्मृतिश्च,
अशेषसामान्यगुणस्तनूजः प्ररोचनार्थं प्रकटीकृतश्च।

अव। तदो, किंति मालदीं अमचो अप्पणा ण माहवस्स पडिवादेदि, जेण चोरिआविआहे भअवदीं तुरावेदि? (१)

कामं।

तां याचते नरपतेर्म्मसुहृन्नन्दनो नृपमुखेन;
तत्साक्षात्प्रतिषेधः कोपाय शिवस्त्वयमुपायः।

अव। अच्चरीअं, अच्चरीअं, ण क्खु अमचो माहवस्स णामंपि जाणादित्ति णिरवेक्खदाए लक्खीअदि (२)।

---

(१) ततः किमिति मालतीममात्यो माधवस्यात्मना न प्रतिपादयति, येन चौरिकाविवाहे भगवत त्वरयति।

(२) आश्चर्य्यं आश्चर्य्यं, न खल्वमात्यो, माधवस्य नामापि जानातीति निरपेक्ष्यतया लक्ष्यते।

Digitized by Google

कामं। संवरणं हि तत्।

विप्रेषतस्तु बालत्वात्तयोर्विकृतभावयोः,

तेन माधवमालत्योः कार्य्यः क्षमतिनिह्नवः।

अपिच ॥

अनुरागप्रवादस्तु वत्सयोः सार्व्वलौकिकः,

श्रेयोऽप्यस्माकमेवं हि प्रतार्य्यौ राजनन्दनौ।

पश्य ॥ बहिस्सर्व्वाकारप्रगुणरमणीयं व्यवहरन्,

पराभूदुस्थानान्यपि लघुतराणि क्षणयति।

जनं विद्वानेकः सकलमभिसन्धाय कपटै

र्घटस्स्वानर्थान् घटयति, च मौनञ्च भजते।

अव। मएवि तुह्मवअणादो, तेण तेण वअणोअ्णासेण, भूरिवसुमन्दिरासण्ण राअमग्गेण माहवो सञ्चारीअदि (१)।

कामं। कथितमेव नो मालतीधात्र्या सवक्रिकया,

भूयोभूयः साधनगरीरथ्यया पर्य्यटन्तं,

दृष्ट्वा, दृष्ट्वा, भवनबलभीतुङ्गवातायनस्था;

साक्षात्कामं नवमिव रतिर्मालती माधवं य

द्गाढोत्कण्ठाखलितसुखितैरङ्गकैराम्यतीति।

अव। वाढं, जं तए वि उक्कण्ठाविणोदणिमित्तं माहव

---

(१) मयापि युष्मदचनान्तेन तेन वचनोपन्यासेन, भूरिवसु मन्दिरासन्नराजमार्गेण माधवः सञ्चार्य्यते।

Digitized by Google

पडिच्छन्दअं आलिहिदं; तं लवङ्गिआए अज्ज मन्दारिआए हत्थे णिहिदं दाव (१)।

कामं ॥ विचिन्त्य ॥ सुविहितं लवङ्गिकया, यतो, माधवानुचरः कलहंसकस्तां विहारदायीं मन्दारिकां कामयते, इत्यनेन तीर्थेन तत्प्रतिच्छन्दकं माधवाभिकमुपेयादित्यभिप्रायः।

अव। अज्ज, माहवोवि कोदूहलमुप्पादिअ, मए पउत्तम अणअत्तामहूसवं मअणुज्जाणं पभादे अणुप्पेसिदो; तहिं किल मालदी गमिस्सदि; तदो अण्णोण्णदंसणं भोदुत्ति (२)।

कामं। साधु, वत्से, साध्वनेन मल्लिकाभियोगेन। स्मारयसि मे पूर्वप्रियां सौदामिनीं?

अव। भअवदि; सा सोदामिणी अज्जणा, समासादिदअरी अमअसिद्धिप्पहावा, सिरिअण्णअस्स कावालिअवदं धारेदि (३)।

---

(१) यत्तथाप्युत्कण्ठाविनोदनिमित्तं माधवप्रतिच्छन्दकमालिखितं तल्लवङ्गिकया अद्य मन्दारिकायाहस्ते निहितं तावत्।

(२) अद्य, माधवोऽपि कौतूहलमुत्पाद्य मया प्रवृत्तमदनमहोत्सवं मदनोद्यानं प्रभातेऽनुप्रेषितस्तत्र किल मालती गमिष्यति; तत्रान्योन्यसंदर्शनं भवतिति।

(३) भगवति सा सौदामिनी अधुना समासादितार्य्य मन्त्रसिद्धिप्रभावा श्रीपर्व्वते कापालिकव्रतं धारयति।

Digitized by Google

कामं। कुतः पुनरियं वार्त्ता?

अव। अत्थि, एत्थ खल्लु सरे, महासमसाणप्पदेसे, कराला णाम चामुण्डा (१)।

कामं। अस्ति वा किल विविधजीवोपहारप्रियेति साधुभि कामां प्रवादः।

अव। तहिं खलु, सिरिपव्वदादो आअदस्स, रत्तिविहारिणो दूरारण्णवासिणो साहअस्स, मुण्डधारिणो ऽघोरघण्टणामधेअस्स, अन्तेवासिणी महाप्पभावा कवालकुण्डला णाम, अणुसंधं समागच्छदि; तदो दूअं पउत्ती (२)।

कामं। सर्व्वं सौदामिन्यां समाप्यते।

अव। अलं दाव एदिणा। भअवदी, एसोवि सहअरो माहवस्स, वालमित्तो मअरंदो णाम, णंदणस्स वहिणिं मद

---

(१) अस्मिन्च नगरे, महाश्मशानप्रदेशे, कराला नाम चामुण्डा।

(२) तत्र खलु, श्रीपर्व्वतादागतस्य, रात्रिविहारिणो नाति दूरारण्यवासिनः साधकस्य, मुण्डधारिणो ऽघोरघण्टनाम धेयस्य, अन्तेवासिनी महाप्रभावा कपालकुण्डला नाम, अनु सन्ध्यं समागच्छति; तत दूतं प्रवृत्तिः।

ख

Digitized by Google

अंतिअं जइ समुव्वहदि, तंपि णाम माहवस्स दुदीअंपिअं किदं भोदि (१)।

कामं। णियुत्तोव मया तप्पियसखी तव बुद्धरक्खिता।

अव। सुविहिदं भअवदीए किदं (२)।

कामं ॥ विचिन्त्य॥ तदुचितं, माधवप्रवृत्तिमुपलभ्य, मालतीमेव पश्यावः॥ इत्युभ उत्तिष्ठतः॥

कामं॥ विचिन्त्य ॥ अत्युदारप्रकृतिर्मालती; तन्निपुणं निसृष्टार्थदूतीकल्पलक्षयितव्यः। सर्व्वथा।

अरज्योत्स्नाकान्तं कुमुदमिव तं नन्दयतु सा,
सुजातं कल्याणी भवतु कृतकृत्यः सच युवा;
वरीयानन्योन्यप्रगुणगुणनिर्माणनिपुणो,
विधातुर्व्यापारः फलतु च मनोज्ञस्य भवतु।

॥ इति निष्क्रान्ते ॥ विष्कम्भकः।

॥ ततः प्रविशति, गृहीतचित्रोपकरणः कलहंसः॥

कल। कहिं दाणिं तुलिदमअरद्धअरूआवलेवविब्भमा वखित्तमालदीहिअअमाहप्पिं, णाहमाहवं पेक्खिस्सं॥परिक्रम्य॥

---

(१) अयं तावदेतेन। भगवति, एषोऽपि सहचरो माधवस्य, वाप्तमिदं मकरन्दो नाम, नन्दनस्य भगिनीं मदयन्तिकां यदि समुद्वहति, तदपि माधवस्य द्वितीयं प्रियं कृतं भवति।

(२) सुविहितं भगवत्या कृतं।

Digitized by Google

परिस्संतोह्मि, जाव दह उज्जाणे मुहुत्तं विस्समिअ, मअरंद सह अरं णाहमाहवं पेक्खिस्सं (१)।

॥ इति प्रविश्योपविशति ॥

॥ ततः प्रविशति मकरन्दः ॥

मक। कथितमवलोकितया मदनोद्यानं गतो माधवइति, भवतु, तत्रैव गच्छामि ॥ परिक्रम्य दृष्ट्वा च ॥ अयं वयस्य इत एवाभिवर्त्तते ॥ निरूप्य ॥ अस्य तु

गमनमलसं, शून्या दृष्टिः, शरीरमसौष्ठवं,
स्खलितमधिकं, किं नेतस्याच्किमन्यदितोऽथवा;
भ्रमति भुवने कन्दर्पाज्ञा, विकारि च यौवनं,
ललितमधुरास्ते भावाः क्षिपन्ति च धीरतां।

॥ ततः प्रविशति, यथानिर्दिष्टो माधवः ॥

माधवः ॥ स्वगतं ॥

तामिन्दुसुन्दरमुखीं सुचिरं विभाव्य,
चेतः कथं कथमपि व्यपवर्त्तते मे;
लज्जां विजित्य, विनयं विनिवार्य्य, धैर्य्य
मुन्मथ्य, मन्थरविवेकमकाण्ड एव।

---

(१) कस्मिन्निदानीं त्वरितमकरध्वजरूपावलेपविभ्रमावच्छिन्नमालतीहृदयमाहात्म्यं, नाथमाधवं प्रेक्षिष्ये। परिश्रान्तोऽस्मि, तावत्तदिदोद्याने मुहूर्त्तं विश्रम्य मरकन्दसहचरं नाथ माधवं प्रेक्षिष्ये।

Digitized by Google

आश्चर्यं!

यदिह्मथस्मिमितमस्मिताम्बभाव
मानन्दमन्दमदतस्रवनादिवाभूत्,
तत्सन्निधौ; तदधुना हृदयं महीय
मङ्गारचुम्बितमिव व्यथमानमास्ते।

मक। सखे माधव, दृतदृतः।

माध॥ परिक्रम्य॥ कथं, प्रियवयस्योमम मकरन्दः!

मक॥ उपसृत्य॥ सखे, ललाटन्तपस्तपति घर्मांशुस्तदस्मिन्नुद्याने मुहूर्त्तमुपविशावः।

माध। यथा प्रियवयस्याय रोचते॥ इत्युभावुपविशतः॥

कल॥ दृष्ट्वा॥ कधं, मअरंदसहअरो इदं ज्जेव्व वासव उज्जाणं अलंकरेदि माहवो; ता दंसेमि, मअणवेअणाखिण्णमाणसदीलोअणसुहावहं अत्तणो से पडिच्छंदअं? अहवा मुहुत्तं विस्सामसोक्खं दाव अणुभोदु (१)।

मक। तदस्यैवं तावदुच्छ्वसितकुसुमकेसरकषायशीतलामोदवासितोद्यानस्य कञ्चनपादपस्याधस्तादुपविशावः।

॥ तथा कुरुतः॥

---

(१) कधं, मकरन्दसहचरदइतमेव वासवकुलोद्यानमलङ्करोति, नाथमाधवसहर्ज्जयामि मदनवेदनाखिद्यमानमानसतीलोचनसुखावहमात्मनस्तस्य प्रतिच्छन्दकं; अथवा मुहूर्त्तमत्रैव विश्रामसौख्यं तावदनुभवतु।

Digitized by Google

मक। वयस्य माधव, अद्यैव तावत्कलनगराङ्गनाजन प्रवर्त्तितमहोत्सवाभिरामं मदनोद्यानमयाचाभिनिवृत्तमन्याहृतं भवन्तमवधारयामि, अपि नाम मनागवतीर्णोऽसि रतिरमण वाणगोचरं।

॥ माधवो लज्जयाधोमुखस्तिष्ठति ॥

मक॥ विहस्य॥ तत्किमवगतमुग्धमुखपुण्डरीकस्तिष्ठसि? पश्य।

अन्येषु जन्तुषु रजस्तमसावृतेषु,
विश्वस्य धातरि समः परमेश्वरे च,
सोऽयं प्रसिद्धविभवः किल चित्तजन्मा;
मा लज्जया तव कथञ्चिदपक्षतिर्भूत्।

माध। वयस्य, किं न कथयामि? श्रूयतां। गतोऽहमवलोकिताजनितकौतुकः कामदेवायतनं, तत्र चेतस्तः परिक्रम्यावलोक्य, च, परिश्रमादुल्लसितमदिरामोदमधुरपरिमलाकृष्टस कलमिलदलिकुलपटलसंकुलाकुलितमुकुलावलीमनोहराम रणरमणीयस्याङ्गनभुवो वासवकुसुमस्तवावसरे स्थितः। तस्य च, यदृच्छया निरन्तरनिपतितानि कुसुमान्यादाय विद ग्धरचनामनोहरां स्रजमभिनिर्मातुमारब्धवानस्मि। अनन्त रञ्च, संचारिणीव देवस्य मकरकेतोर्जगद्विजयवैजयन्तिका, निर्गत्य गर्भभवनादुज्ज्वलविदग्धमुग्धवेषविरचनाविभावित कुमारीभावा महानुभावप्रकृतिरत्युदारपरिजना कापि तत एवागतवती।

Digitized by Google

सा रामणीयकनिधेरधिदेवता वा,
सौन्दर्य्यसारसमुदायनिकेतनं वा;
तस्याः, सखे, नियतमिन्दुसुधामृणाल
ज्योत्स्नादिकारणमभून्मदनस्य वेधाः।

अथ सा प्रणयिनीभिरनुचरीभिरविरलकुसुमसंचयावचयलीलादोहनीभिरभ्यर्थ्यमाना, तमेव वासवकुलपादपोद्देशमासनवती, तस्याश्च कस्मिंश्चिदपि महाभागधेयजन्मनि बद्धदिवसोपचीयमानमिव मन्मथव्यथाविकारमुपलभ्यवानस्मि, यतः।

परिस्पन्दितमृणालीस्तानमुखं प्रवृत्तिः,
कथमपि परिवारप्रार्थनाभिः क्रियासु;
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी
मभिनवकरिदन्तच्छेदपाण्डुः कपोलः।

सा पुनर्मम प्रथमदर्शनक्षणात्प्रभृति अमृतवर्त्तिरिव चक्षुषो रतिप्रयानन्दमुत्पादयती, अयस्कान्तमणिप्रख्याकेवलोहधातु मन्तःकरणमाकृष्टवती; किं बहुना;

सन्तापसन्ततिमहाव्यसनाय तस्या
मासक्तमेतदनपेक्षितहेतु चेतः;
प्रायः शुभस्य विदधात्यशुभस्य जन्तोः,
सर्व्वंक्षमा भगवती भवितव्यतैव,

मक। वयस्य माधव, स्नेहस्य निमित्तसव्यपेक्षत्वेति विप्रतिषिद्धमेतत्।

Digitized by Google

पश्यति। व्यवजति पदार्थान्तरः कोऽपि हेतु
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते;
विकसति हि पतङ्गस्योदये पुण्डरीकं,
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः। ततस्ततः।

माध। ततश्च तच,

भ्रूविलासमथ सोऽयमितीरयित्वा,
सप्रत्यभिज्ञमिव मामवलोक्य तस्याः,
अन्योन्यभावचतुरेण सखीजनेन,
मुक्ताखदा स्मितसुधामधराः कटाक्षाः।

मक॥ स्वगतं॥ कथं प्रत्यभिज्ञापि नाम?

माध। अथ ताः सखीसमुत्तालकरकमलतालिकातरलय लयावलीकमुत्तरलमत्तकलहंसविभ्रमाभिरामचरणसञ्चरणस ञ्जायमानमञ्जीरमञ्जुझिञ्जितानुविद्धमेखलाकलापकिङ्कि णीरणत्कारमुखरं प्रतिनिवृत्य, भर्तृदारिके, दिष्ट्या वर्द्धामहे; यदत्रैव कोऽपि कस्यापि तिष्ठतीति मामङ्गुलीदलविलासेनाख्या तवत्यः।

मक॥ स्वगतं॥ हन्त, महतः प्रागनुरागस्योद्भेदः!
कल। कथं, सरसरमणीयानुबन्धिनी स्त्रीजनकथा? (१)।
मक। ततस्ततः।

---

(१४) कथं, सरसरमणीयानुबन्धिनी स्त्रीजनकथा?

Digitized by Google

माध। अचान्तरे किमपि वाग्विभवातिवृत्त,
वैचित्र्यमुल्लसितविभ्रममुत्पलाक्ष्याः;
तन्नूरिषालिकविकारमपास्तधैर्य्य
माचार्य्यकं विजयिमन्मथमाविरासीत्।

ततश्च। स्तिमितविकसितानामुल्लसद्भ्रूलतानां,
मसृणमुकुलितानां प्रान्तविस्तारभाजां,
प्रतिनयननिपाते किञ्चिदाकुञ्चितानां,
विविधमहमभूवं पात्रमालोकितानां।

तैश्च। अलसवलितमुग्धस्निग्धनिष्पन्दमन्दै
रधिकविकसदन्तर्व्विस्मयस्तोरतारैः,
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षै
रपहृतमपि विद्धं पीतमुन्मूलितञ्च।

एवमहन्तु तस्याः सर्व्वाकारहृदयङ्गमायाः संभाव्यमान स्नेहरसेनाभिसन्धिना विधेयीकृतोऽपि पारिप्लवत्वमात्मनोऽपनि नीषुकामः, प्राक्प्रस्तुतस्य वकुलदाम्नो यथाकथञ्चिदवशेषं ग्रथितवानेव; ततोमिलितवेणुग्रस्तपाणिवर्षवरप्रायपुरुषपरिवारा, गजवधूमारूढा, नगरगामिनं मार्गमिन्दुवदनालङ्कृतवती; तदा च;

यान्त्यामुर्ज्ज्वलितकन्धरमाननम्र
दाकृष्टवृन्तनतपत्रनिभं वहन्त्या,
दिग्धोऽनुतेन च, विषेण च, पक्ष्मलाक्ष्या,
गाढं निखातइव मे हृदये कटाक्षः।

Digitized by Google

ततः प्रभृति

परिच्छेदातीतः सकलवचनानामविषयः,
पुनर्जन्मन्यस्मिन्ननु भवपथं यो न गतवान्;
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः, कोऽप्यन्तर्भ्रमयति च तापञ्च कुरुते।

अपिच।

परिच्छेदव्यक्तिर्भवति न पुरःस्थेऽपि विषये,
भवत्यभ्यस्थेऽपि स्मरणमनथाभावविरसं;
न सन्तापच्छेदो हिमसरसि वा चन्द्रमसि वा,
मनोनिष्ठाशून्यं भ्रमति, च किमप्यालिखति च।

कथं। दिट्ठं खु एसो कएवि अवहरिदो, अवि णाम मालदी जेव्व सा भवे (१)।

मकरं॥ स्वगतं॥ अहो अभिव्यक्तः; तत्किं निषेधयामि मुहृदं? अथवा,

मामूमुहत् खलु भवन्मदनन्यजन्मा,
मा ते मनीषमविकारघना मतिर्भूत्;
इत्यादि नश्चिह्न निरर्थकमेव यस्मा
त्कामस्य वृत्तिगुणो, नवयौवनञ्च।

॥ प्रकाशं॥ अयि वयस्य, न विदिते तदन्वयनामनी?

(१) दिट्ठं खल्वेष कथाप्यपहृतः, अपि नाम मालत्येव सा भवेत्।

Digitized by Google

माध। सखे, श्रूयतां ; अथ तस्याः करेणुकारोहणसमयएव महतः सखीकदम्बकादन्यतमा वारयोषिदिखस्य, वासवकुल कुसुमावचयक्रमेण नेदीयसी भूत्वा, प्रणम्य, कुसुमापीडव्याजेन मामेवमुक्तवती ; महाभाग, सुश्लिष्टगुणतया रमणीयएष वः सुमनसां सन्निवेशः, कुतूहलिनी च नो भर्त्तदारिका वर्त्तते, तस्यामभिनवो विधिचः कुसुमेषुव्यापारस्तद्भवतु कृतार्थता, वैदग्ध्यस्य फलतु निर्माणरमणीयता, विधातुरास्वादयतु सरसएष भर्त्तदारिकायां कण्ठावलम्बनमहार्घ्यतामिति।

मकरन्दः। अहो वैदग्ध्यं।

माध। तथा च मदनुयुक्तया समाख्यातमियममात्यभूरिवसोः प्रसूतिर्मालती नाम; अहञ्च प्रसादभूमिर्भर्त्तदारिकायाः धात्रेयिका, सवयस्किका नामेति।

कल॥ सहर्षं॥ किं णाम मालदीत्ति; दिट्ठिआ विलसिदं खु भअवदा देवेण कुसुमाउहेण ; ता जिदं अम्हेहिं (१)।

मक। अमात्यभूरिवसोरात्मजेत्यपर्य्याप्तिर्व्वऊमानस्य।

अपिच। मालती मालतीति मोदते भगवती कामन्दकी, तान्न किल राजा नन्दनाय प्रार्थयतइति किंवदन्ती श्रूयते।

---

(१) किं नाम मालतीति; दिष्ट्या विलसितं खलु भगवता देवेन कुसुमायुधेन ; तज्जित मस्माभिः।

Digitized by Google

माध। तथा चाहमभ्यर्थमानस्तां वकुलमालामात्मनः कण्ठादवतार्य्य दत्तवान्, असौ पुनरभिनिविष्टया हृता मालती मुखावलोकनविहितया, विषमविरचितैकभागान्तामेव वक्त्र मन्यमानो, महानयं प्रसाद इति, गृहीतवती, अनन्तरञ्च याचा भङ्गप्रचलितस्य महतः पौरजनस्य संकुलेन विघटितायां तस्यां मागतोऽस्मि।

मक। वयस्य, मालत्यामपि स्नेहदर्शनादुल्लिष्टमेतत्; योऽपि हि कपोलपाण्डुतादिसूचितप्राक्प्रवृद्धरागाः कामाभिव्यक्तः, सोऽपि त्वयिबन्धनदृत्यभिव्यक्तमेवैतत्, एतत्तु न ज्ञायते; क्व दृष्टपूर्व्वस्तया वयस्य इति; न खलु तादृशो महाभागधेयाः कुमार्य्योऽन्यचासक्तमनसोभूत्वान्यत्र चतुरागिणो भवन्ति।

अपिच।

अन्योन्यसक्तिसदृशां यदीनां तस्यास्त्वयि प्रागनुरागसिद्धं,
कस्यापि कोऽपीति विवेदितुञ्चधाचेयिकायास्तुरं वचस्व।

कल ॥ उपसृत्य ॥ एदं च चित्तफलअं (१)।

॥ इति चित्रफलकं दर्शयति ॥ उभौ पश्यतः॥

मक। कलहंसक, केनैतन्माधवस्य प्रतिबिम्बमभिलिखितं?

कल। जेणजेव्व से हिअअं अवहरिदं (२)।

---

(१) इदं चित्रफलकं।

(२) येनैवास्य हृदयमपहृतं।

Digitized by Google

मक। अयि मालत्या?

कल। अथदं (१)।

माध। वयस्य मकरन्द, प्रसन्नप्रायस्ते वितर्कः।

मक। कलहंसक कुतोऽस्याधिगमः?

कल। मए दाव मन्दारिआए हत्थादो, तएवि खव क्खिआसआसादो (२)।

मक। अथ किमाह मन्दारिका माधवालेख्यप्रयोजनं मालत्याः?

कल। उक्कण्ठाविणोदेत्ति (३)।

मक। वयस्य माधव, सर्व्वथा समाश्वसिहि।

या कौमुदी नयनयोर्भवतः सुजन्मा,
तस्याभवानपि मनोरथबन्धबन्धुः;
तत्सङ्गमं प्रति, सखे, न हि संशयोऽस्ति,
यस्मिन्विधिस्त्वदनस्य कृताभियोगः।

---

(१) अथकिं।

(२) मया तावन्मन्दारिकायाहस्तात्तयापि खवक्षिकाया काशात्।

(४) उत्कण्ठाविनोदनमिति।

Digitized by Google

दृष्टव्यरूपा च भवतो विकारहेतुस्तदत्रैव लिख्यतां मालती।

माध। यदभिरुचितं वयस्याय; तदुपनय चित्रफलकं चित्रवर्त्तिकाश्च।

॥ मकरन्द उपनयति ॥

माध॥ लिखन्॥ सखे मकरन्द।

वारंवारं तिरयति दृशोरुद्गमं वाष्पपूर
स्तस्तङ्कल्पोपहितजडिमस्तम्भमभ्येति गात्रं;
सद्यः खिद्यन्नयनविरलोत्कम्पलोलाङ्गुलीकः,
पाणिर्लेखाविधिषु नितरां वर्त्तते, किङ्करोमि!

तथापि व्यवसितोऽस्मि॥ चिरादभिलिख्य प्रदर्शयति॥

मक॥ विलोक्य॥ उपपन्नस्तावदत्र भवतोऽभिव्यक्तः॥ सकौतुकं॥ कथमचिरेणैव निर्माय लिखितः॥ श्लोकं वाचयति॥

जगति जयिनस्ते ते भावा नवेन्दुकलादयः,
प्रकृतिमधुरास्त्वन्त्वेवान्ये मनोमदयन्ति ये;
मम तु यदियं याता लोके विलोकनचन्द्रिका,
नयनविषयं जन्मन्येकः सएव महोत्सवः।

॥ प्रविश्य सत्वरं मन्दारिका। कलहंसक, पदानुसारेण उपलब्धोसि॥ माधवमकरन्दौ दृष्ट्वा सलज्जं॥ कथं, तेवि महाणुभावा दूधजेव्व? (१)।

---

(१) कलहंसक, पदानुसारेणोपलब्धोसि। कथमेतावपि महानुभावावत्रैव।

Digitized by Google

॥ उपसृत्य प्रणमति ॥

उभौ। मन्दारिके दृष्टासि।

मन्दा॥ उपविश॥ कलहंसअ, उवणेहि मे चित्त फलअं(१)।

कल॥ गृहीता॥ गेण्ह एदं(२)।

मन्दा॥ विलोक्य॥ कलहंसअ, केण उण, किंणिमित्तं वा, एत्थ मालदी आलिहिदा?(३)।

कल। जो जेव्व जंणिमित्तं मालदीए(४)।

मन्दा॥ सहर्षं॥ दिट्ठिआ दंसिदफलं दाणिं विण्णाअ पआवदणो(५)।

मक। मन्दारिके, यदत्र वस्तुनि एष ते वल्लभः, कथय त्यपि तथा तत्?

मन्दा। महाभाअ, अधदं(६)।

---

(१) कलहंसक, उपनय मे चित्रफलकं।

(२) गृहाणेदं।

(३) कलहंसक, केन पुनः, किंनिमित्तं वा, अत्र मालती आलिखिता?

(४) यो यन्निमित्तं मालत्याभिलिखितः।

(५) दिष्ट्या दर्शितफलमिदानीं विज्ञानं प्रजापतेः।

(६) महाभाग, अथकिं।

Digitized by Google

मक। का पुनर्मालती माधवं प्राग्दृष्टवती ?

मन्दा। लवङ्किआ भणादि, वादाअणगदेत्ति (१)।

मक। वयस्य, नन्वमात्यभवनासन्नरथ्यैव वर्त्तते: सच्च रावहे, तदुपपन्नमेतत्।

मन्दा। अणुमण्णदु मं महाणुभावा; जाव एअं भअवदो देव्वस्स मअणस्स सुचरिदं पिअसहीए लवङ्किआए णिवेदेमि (२)।

मक। प्राप्तावसरमेतन्नवत्या:॥ मन्दारिका चित्रफलकं गृहीत्वा निष्क्रान्ता॥

मक। वयस्य, खरतरकिरणोऽयं भगवान्सहस्रदीधितिर लङ्करोति मध्यमम्बरं; तदेहि संस्थायमेव गच्छाव:॥ इत्युत्थाय परिक्रामत:॥

माध। एवं हि मन्ये।

घर्मांशोर्विशदविवर्त्तनैरिदानीं
मुग्धाक्ष्या: परिजनवारसुन्दरीणां;
तन्मात्रविहितविचित्रपत्रलेखा,
वैदग्ध्यं जहति कपोलकुङ्कमानि।

---

(१) लवङ्किका वदति, वातायनगतेति।

(२) अनुमन्येतां मां महानुभावौ; यावदिदं भगवतो देवस्य मदनस्य सुचरितं प्रियसख्या लवङ्किकाया निवेदयामि।

Digitized by Google

अपिच।

उन्मीलन्मुकुलकरालकुन्दकोड-
प्राग्भोगद्रुमकरन्दगन्धबन्धो,
तामीषत्प्रचलविलोचनां नताङ्गी
मालिङ्गन्पवन मम त्वमाङ्गमङ्गं।

मक। अभिहन्ति, हन्त, कथमेष माधवं,
सुकुमारकायमनवग्रहः स्मरः;
अचिरेण वैकृतविवर्त्तदारुणः,
कलभं कठोरइव कूटपाकलः।
तदत्र भगवती नः शरणं कामन्दकी।

माध॥ स्वगतं॥ आश्चर्यं।

पश्यामि तामितइतः पुरतश्च पश्चा
दन्तर्वहिः परितएव विवर्त्तमानां;
उद्बुद्धमुग्धकनकाञ्जनिभं वहन्ती
मासक्तिर्य्यगपवर्त्तितदृष्टि वक्त्रं।

॥ प्रकाशं॥ वयस्य, मम हि संप्रति,
प्रसरति परिमाथी कोऽप्ययं देहदाह
स्त्रिरयति करणानां ग्राहकत्वं प्रमोहः;
रणरणकविदृब्धिं बिभ्रदावर्त्तिवाचं,
ज्वलति हृदयमन्तस्तन्मयत्वञ्च धत्ते।

॥ इति निष्क्रान्ताः सर्वे ॥ वकुलवीथीनाम प्रथमोऽङ्कः ॥

Digitized by Google

॥ अथ द्वितीयोऽङ्कः ॥

॥ ततः प्रविशत्येकौ ॥

एका। सखि, सङ्गीतशालापरिसरे अवलोकिता दुहिता किं मन्त्रयन्ती त्वं भाषि? (१)

द्वितीया। सखि, तेन किल माधवप्रियवयस्येन मकरन्देन सकल एव मदयोद्यानवृत्तान्तो भगवत्यै निवेदितः (२)।

प्रथमा। ततोकिं? (३)

द्वितीया। ततोभर्तृदारिकां द्रष्टुकामाया भगवत्या प्रवृत्तिनिमित्तं अवलोकिता अनुप्रेषिता! मयापि तस्यै कथितं, यथा सवलिकाद्वितीया विविक्ते भर्तृदारिका वर्त्तते (४)।

प्रथ। सखि, सवलिका खलु केसरकुसुमान्यवचिनोमीति, मदयोद्यानादेव नागता; तत किं सम्यक् संपन्ना? (५)।

---

(१) सखि, सङ्गीतशालापरिसरे अवलोकिता द्वितीया किं मन्त्रयन्ती त्वं भाषीः?

(२) सखि, तेन किल माधवप्रियवयस्येन मकरन्देन सकल एव मदयोद्यानवृत्तान्तो भगवत्यै निवेदितः।

(३) ततः किं?

(४) ततो, भर्तृदारिकां द्रष्टुकामया भगवत्या प्रवृत्तिनिमित्तं अवलोकिता अनुप्रेषिता; मयापि तस्यै कथितं, यथा सवलिकाद्वितीया विविक्ते भर्तृदारिका वर्त्तते।

(५) सखि, सवलिका खलु केसरकुसुमान्यवचिनोमीति, मदयोद्यानादेव नागता; तत किं सम्यक् संपन्ना

Digitized by Google

दिती। अधदं; तं क्खु परावडन्तीमेव हत्थे गेण्हिअ, पडिणिक्खुपरिअणा, भट्टिदारिआ उअरिअलिन्दअं समारूढा (१)।

प्रथ। णूणं तस्स महाणुभावस्स संकधाए अत्ताणं विणोदेदि (२)।

दिती॥ निअस्स॥ कुदो से आआसो! एदिणा अज्ज सविसेस दंसणेण अदिभूमिं खु ताए अहिणिवेसो गमिस्सदि। कल्लमेव, णन्दणस्स कारणादो महाराओ भट्टिदारिअं अभत्थन्तो अमच्चेण विण्णत्तो (३)।

प्रथ। किंत्ति? (४)

दिती। पहवदि णिअस्स कण्णाजणस्स महाराओत्ति। ता जाणं आमरणं खु हिअअगअं मालदीए माहवानुराओत्ति तक्केमि (५)।

---

(१) अथकिं; तां खलु परापतन्तीमेव हस्ते गृहीत्वा, प्रतिषिद्धपरिजना, भर्तृदारिकोपर्यलिन्दं समारूढा।

(२) नूनं तस्य महानुभावस्य संकथयात्मानं विनोदयति।

(३) कुतस्तस्याश्वासः! एतेनाद्य सविशेषदर्शनेनातिभूमिं खलु तस्या अभिनिवेशो गमिष्यति। कल्यमेव नन्दनस्य कारणान्महाराजो भर्तृदारिकां प्रार्थयमानोऽमात्येन विज्ञप्तः।

(४) किमिति।

(५) प्रभवति निजस्य कन्यकाजनस्य महाराजइति। तज्ज्ञातमामरणं खलु हृदयगतं मालत्यामाधवानुरागइति तर्कयामि।

Digitized by Google

प्रथ। अवि णाम, भअवदी किंपि एत्थ भअवदीअत्तणं दंसइस्सदि (१)।

दिती। अइ असम्बद्धमनोरधे! एहि, गच्छम्हः (२)।

॥ इति परिक्रम्य निष्क्रान्ते। प्रवेशकः॥

॥ ततः प्रविश्योपविष्टा लोकधात्री मालती लवङ्गिका च॥

मालती। जं सहि, तदो, तदो (३)।

लवङ्गिका। तदो तेण महाणुभावेण उवणीदा मे इअं वउलमाला (४)॥ इति मालामर्पयति॥

माल॥ गृहीत्वा, सहर्षं निर्व्वर्ण्य॥ सहि, एक्कपासविसमपडिबद्धा खु इअं विरअणा (५)।

लवं। एत्थ दाव अरमणीअत्तणे तुमंज्जेव अवरज्झसि (६)।

---

(१) अपि नाम भगवती किमप्यत्र भगवतीत्वं दर्शयिष्यति।

(२) अयि असम्बद्धमनोरथे! एहि, गच्छावः।

(३) सखि, ततस्ततः।

(४) ततः तेन महानुभावेनोपनीता मे एषा वकुलमाला।

(५) सखि एकपार्श्वविषमप्रतिबद्धा खल्वियं विरचना।

(६) अत्र तावदरमणीयत्वे त्वमेवापराध्यसि।

Digitized by Google

माल। कथंविध!

लवं। जेण सो मुद्धदुव्वासामलङ्गो तधा विहत्थीकदो (१)।

माल। पिअसहि लवङ्गिए सव्वधा आसासणसीलासि (२)।

लवं। सहि, का एत्थ आसासणसीलदा? णंभणामि; सोवि पिअसहीए मन्दमारुदुल्लेल्लत्थप्फुल्लपुण्डरीअविब्भमेहिं पढमावद्धबउलावलीविरअणावदेसंजमिदवलामोडिविच्चरन्तेहिं लोअणेहिं, विअम्भमाणविस्सअत्थिमिददीहपेरन्तपरिअत्तणविलासतण्डविदभूलदाविडम्बिदाणङ्गसारङ्गविब्भमविअड्ढं अवलोअअन्ते पच्चक्खीकदोम्हेव्व (३)।

माल॥ लवङ्गिकाम्परिष्वज्य॥ अम्मो! पिअसहि, किं तस्स

---

(१) येन स मुग्धो दूर्व्वाश्यामलाङ्गस्तथा विहस्तीकृतः।

(२) प्रियसखि लवङ्गिके सर्व्वथा आश्वासनशीलासि।

(३) सखि, काच आश्वासनशीलता! ननु भणामि; सोऽपि प्रियसख्या मन्दमारुतोद्वेल्लत्प्रफुल्लपुण्डरीकविभ्रमाभ्यां प्रथमाबद्धबकुलावलीविरचनापदेशसंयमितवलामोडिविस्तृताभ्यां लोचनाभ्यां विजृम्भमाणविस्रब्धस्तिमितदीर्घपर्य्यन्तपरिवर्त्तनाविलासताण्डवितभ्रूलताविडम्बितानङ्गशारङ्गविभ्रमविदग्धमवलोकयन् प्रत्यक्षीकृतएव।

Digitized by Google

दाव महानुभावस्स सहाविआएव्वेव मुहुत्तसन्निधाइणो जणस्स विप्पलम्भहेदुआ विलासा; आउ जहा पिअसही संभावेदि (१)।

सवं॥ विहस्स सासूयमिव॥ तुमं सहावेण व्वेव तस्सिं अवसरे असङ्कीदअं णच्चिदासि (२)।

माल॥ सलज्जं॥ ङं; तदो, तदो।

सवं। तदो पडिणिअत्तमाणजत्ताजणसङ्कुलेण अन्तरिदे तस्सिं जणे, मन्दारिआए घरं उपगदत्थि; ताए खु चित्तफलअं पभादे हत्थीकिदं आसि (३)।

माल। किं णिमित्तं (४)?

---

(१) हर्षे! प्रियसखि किं तावत्तस्य महानुभावस्य स्वाभाविकाएव मुहूर्त्तसन्निधायिनोजनस्य विप्रलम्भहेतुका विलासा आहोस्वित् यथा प्रियसखी संभावयति।

(२) त्वमपि स्वभावेनैव तस्मिन्नवसरेऽसङ्गीतकं नर्त्तितासि।

(३) ततः प्रतिनिवर्त्तमानयात्राजनसङ्कुलेनान्तरिते तस्मिन् जने, मन्दारिकायागृहमुपगतासि; तया खलु चित्रफलकं प्रभाते हस्तीकृतमासीत्।

(४) किं निमित्तं?

Digitized by Google

सवं। तं खु माहवाणुचरं, कलहंसओ णाम, कामेदि; सा तस्स संदंसइस्सदित्ति; तदो पिअणिवेदिआ मे मन्दारिआ संवुत्ता (१)।

माल॥ सगतं॥ णूणं तेणावि कलहंसएण तं पडिछन्दअं अत्तणोणाहस्स दंसिदं भविस्सदि॥ प्रकाशं॥ सहि, किं दाणिं दे पिअं (२)।

सवं। एदं, खु, सन्दाविदस्स सन्दावआरिणोदुल्लह मणोरहावेसदूःसहाआसदड्ढमाणचित्तस्स खणमेत्तणिव्वावअं, तुह पडिछन्दअं (३)॥ इति चित्रं दर्शयति॥

माल॥ सहर्षं सोल्लासं चित्रं निर्वर्ण्य॥ अहो दाणिंपि हिअअस्स मे अणासङ्गो, जेण एवंपि आसासणं विप्पलम्भोत्ति संभावेमि, कधं! अक्खराइं (४)।

---

(१) तां खलु माधवानुचरः, कलहंसको नाम, कामयते; तस्य सा दर्शयिष्यतीति; ततो मे प्रियनिवेदिका मन्दारिका संवृत्ता।

(२) नूनं तेनापि कलहंसकेन तत्प्रतिछन्दकमात्मनः प्रभोर्दर्शितं भविष्यति। सखि किमिदानीं ते प्रियं।

(३) एतत्, खलु, सन्तापितस्य सन्तापकारिणो दुर्लभमनोरथावेशदुःसहायासदह्यमानचित्तस्य क्षणमात्रनिर्व्यापकं तव प्रतिच्छन्दकं।

(४) अहो इदानीमपि मे हृदयस्य अनासङ्गो, येनैवमप्यासासनं विप्रलम्भइति सम्भावयामि! कथमक्षराण्यपि।

Digitized by Google

॥ इति वाचयति ॥ अगति अधिगच्छ ते भावानवेन्दुकलादय इत्यादि पूर्व्वोक्तं पठित्वा ॥ सानन्दं ॥ महाभाग; खलु सदृशं दे णिम्माणस्स विरअणामधुरदा, दंसणं, उण तक्काखमणोहरं, परिणामदीहसन्तापदारुणं। धण्णाओ खलु ताओ कण्णआओ जाओ तुमं ण पेक्खन्ति; अवि णाम अत्तणोहिअअस्स पहवन्ति॥ इति रोदिति॥ (१)।

सवं। सहि, किं एव्वंपि दे णत्थि आसासो? (२)

माल। सहि कधं?

सवं। जस्स कारणादो, उक्खंडिअवंधणं विअ, कडेल्लिपल्लवं, किविस्सन्तणीमालिआकुसुमणिस्सहा परिक्खिज्जसि, सोवि आणविदो भअवदा मम्महेण सन्तावस्स दूसहत्तणं त्ति (३)।

---

(१) महाभाग सदृशं खलु ते निर्म्माणस्य विरचना मधुरता दर्शनं पुनस्तत्कालमनोहरं परिणामदीर्घसन्तापदारुणं। धन्याः खलु ताः कन्यकायास्त्वां न प्रेक्षन्ते; अपि नामात्मनोहृदयस्य प्रभवन्ति।

(२) सखि, किमेवमपि तेनास्त्याश्वासः?

(३) यस्य कारणादुत्खण्डितबन्धनमिव कण्डेलिपल्लवं क्लाम्यन्नवमालिकाकुसुमनिःसहा परिक्षिप्यसे, सोऽपि आज्ञप्तो भगवता मन्मथेन सन्तापस्य दुःसहत्वमिति।

Digitized by Google

माल। कुशलं दाणीं तस्स महाणुभावस्स भोदु; मम उण दुल्लहो आश्वासो॥ सासं॥ विसेसदो अज्ज पिअसहि (१)।

॥ संस्कृतमाश्रित्य ॥

मनोरागस्त्रीव्रं विषमिव विसर्पत्यविरतं,
प्रमाथी निर्धूमं ज्वलति विधुतः पावकइव;
छिनत्ति प्रत्यङ्गं ज्वरइव गरीयानितरतो
न मां चातुं नातः प्रभवति, न चाम्बा, न भवती।

सवं। एवंज्जेव्व, पच्चक्खसोक्खदाइणो परोक्खदुक्खदूसहा आसकारिणोसज्जणसमागमा होन्ति। अवि अ। जस्स वादायणा स्मरमुक्कन्तमेत्तदंसणेण, सविसेससमिद्धुद्धवहायमाण पुण्णिमा चन्दोदआ, णिक्करुणकामव्वावारसंसइदजीविदा दे सरीरावत्था, तस्सज्जेव्व संपत्तसविसेसदंसणा। अज्ज सन्तप्पसित्ति किं एत्थ भणिदव्वं। ता, पिअसही सलाहणिज्जं दुल्लहमणोरहफलं जीअलोअस्स, गुरुअणुराअसरिसमहाणुभावसंगह समागमोत्ति, एत्तिअं आणामो (२)।

---

(१) कुशलमिदानीं तस्य महानुभावस्य भवतु; मम पुनर्दुर्लभआश्वासः विशेषतोऽद्य प्रियसखि।

(२) एवमेव, प्रत्यक्षसौख्यदायिनः परोक्षदुःसहायासकारिणः सज्जनसमागमाभवन्ति। अपिच। यस्य वातायना स्मरमुक्तदर्शनेन सविशेषसमृद्धोद्धतवहायमानपूर्णिमाचन्द्रोदया निष्करुणकामव्यापारसंशयितजीविता ते, शरीरावस्था

Digitized by Google

माल। सहि, दइदमालदीजीविदे, साहसोवक्खामिणि, अवेहि ॥ सासं॥ अहवा, अहंज्जेव्व वारम्वारं पलोअअन्ती, दुक्खावत्थाविदधीरत्तणावट्टम्भेण अत्तणो हिअएण, दूरविरुज्झन्तदुव्विणअलऊई, एत्थ अवरज्झामि; तधावि पिअसहि (१)॥ भूयस्संस्कृतमाश्रित्य॥

ज्वलतु गगणे राचौ राचावखण्डकलः शशी;
दहतु मदनः, किंवा मृत्योः परेण विधास्यति;
मम तु दयितः, साध्यस्यातो अनन्यमनाश्चया,
कुलममलिनं मलेवायं जनो, न च जीवितं।

सवं॥ स्वगतं॥ एत्थ दाणीं को उवाओ? (२)

अथ नेपथ्यार्द्धप्रविष्टा प्रतीहारी। एसा भअवदी कामन्दई (३)।

---

(१) सखि, दयितमालतीजीविते, साहसोपन्यासिनि, अपेहि। अथवा, अहमेव वारंवारं प्रलोकयन्ती, दुःखावस्थापितधीरत्वावष्टम्भेनात्मनोहृदयेन दूरविजृम्भमाणदुर्व्विनयलघ्वी अद्य पराध्यामि तथापि प्रियसखि।

(२) अत्रेदानीं कउपायः?

(३) एषा भगवती कामन्दकी।

Digitized by Google

उभे। किं भगवती?

प्रती। भट्टिदारिअं दट्ठुकामा आगदा.

उभे। तदो किं विलम्बीअदि?

॥ प्रतीहारी निष्क्रान्ता ॥

॥ मालती चित्रफलकं आछादयति ॥

सवं॥ सगतं॥ सुसमीहिदं खु जादं।

॥ ततः प्रविशति, कामन्दक्यवलोकिता च ॥

कामं। साधु, सखे भूरिवसो, साधु; प्रभवति निजस्य कन्या जनस्य महाराज, इत्युभयलोकाविरुद्धवचनमुपन्यस्तं। अपिच। अद्य मन्मथोद्यानवृत्तान्तेन भगवतोविधेरनुकूलतामव गच्छामि; वकुलावलीचित्रफलकव्यतिकरसंविधानकौतुकमद्भुतं प्रमोदमुल्लासयति; इतरेतरानुरागोहि दारकर्मणि पराद्धं मङ्गलं; गीतस्यायमर्थोऽभिरक्षा, यस्यां वाङ्मनसयुषोरनुबन्ध स्तस्या मद्विधिरिति।

अवलो। एसा मालदी।

कामं॥ निर्वर्ण्य॥

निकामं श्यामाङ्गी सरसकदलीगर्भसुभगा,
कलाशेषा मूर्त्तिः प्रथिनदव नेत्रोत्सवकरी;
अवस्थामापन्ना मदनदहनोद्दाहविधुरा
मियं नः कल्याणी रमयति, मनः कम्पयति च।

Digitized by Google

अपिच ।

परिपाण्डुपीवरकपोलमानवं
दधती, मनोहरतरत्वमागता ।
रमणीयजन्मनि जने परिभ्रमन्,
खलितो विधिर्विजयते हि मान्मथः ।

अथवा । नियतमनया सकलनिर्मितः प्रियतमाममोऽनुभूयते ।

तथाह्यस्याः ।

नीवीबन्धोच्छ्वसनमधरस्पन्दनं, दोर्विषादः,
खेदस्वेदस्खलनमधुराकेकरस्निग्धमुग्धं,
गात्रस्तंभः, स्तनमुकुलयोरुत्प्रबन्धः प्रकम्पो,
गण्डाभोगे पुलकपटलं, मूर्च्छना, चेतना च,

॥ इत्युपसर्पति ॥

सर्वं ॥ मालतीं चालयित्वा ॥ मालति, इदा ।

॥ उभे उत्तिष्ठतः ॥

माल । भअवदि, वन्दामि ।

कामं । महाभागे, अभिमतफलभाजनं भूयाः ।

लवं । एदं आसणं; एत्थ उवविसदु भअवदी ।

॥ सर्व्व उपविशन्ति ॥

माल । कुसलं भअवदीए ?

कामं ॥ निःशब्दं ॥ कुशलमिव ।

Digitized by Google

लवं ॥ सगतं ॥ पत्थावणा खलु एसा कवडणाडअस्स ॥ प्रकाशं ॥ गुरुअवाहत्थमवमन्थरिदकण्ठपडिलग्गुणीसासं, अण्णारिसमेव्व भअवदीए वअणं; ता किं दाणीं उव्वेअकारणं भविस्सदि (१)

कामं। नन्वयमेव क्षीरक्षोदरविरुद्धः परिषदः।

लवं। कधंविअ?

कामं। अयि, त्वमपि न वेत्सि?

इदमिह मदनस्य जैत्रमस्त्रं, सहजविलासनिबन्धनं शरीरं,
अनुचितवरसंप्रयोगशोच्यं, विफलगुणातिशयं भविष्यतीति।

॥ मालती वैचित्यं नाटयति ॥

लवं। अत्थि एदं, णरेन्दवअणाणुरोधिणा अमच्चेण णन्दणस्स पडिवण्णा मालदीत्ति, सअलो जणो अमच्चं जुगुच्छदि (२)।

मालती ॥ सगतं ॥ कधं उवहारीकिदम्हि तादेण राइणो? (३)

---

(१) प्रस्तावना खलु एषा कपटनाटकस्य। गुरुवाष्पस्तम्भमन्थरितकण्ठप्रतिलग्गनिश्वासमन्यादृशमेव भगवत्यावचनं तत् किमिदानीमुद्वेगकारणं भविष्यति?।

(२) अस्तीदं, नरेन्द्रवचनानुरोधिनामात्येन नन्दनस्य प्रतिपन्ना मालतीति, सकलो जनोऽमात्यं जुगुप्सते।

(३) कथमुपहारीकृतास्मि राज्ञस्तातेन?

Digitized by Google

कामं॥ आश्चर्यं॥

गुणापेक्षाशून्यं कथमिदमुपक्रान्तमथवा,
कुतोऽपत्यस्नेहः कुटिलनयनिष्णातमनसां;
इदं तेदंपर्य्यं यदुत नृपतेर्मन्त्रसचिवः,
सुतादानान्निचं भवतु; स हि मे नन्दनरतिः।

माल॥ स्वगतं॥ राआराहणं खु तादस्स गुरुअं, ण उण मालदी (१)।

स्वं। एवं जधा भअवदीए आणत्तं; अधा तस्सिं वरे दुइं सणे अदिक्कन्तजोव्वणे किं ण विआरिअं अमच्चेण? (२)

माल॥ स्वगतं॥ हा हदस्सि, समुवत्थिदाणत्थवज्जपदणा मन्दभाइणी (३)।

स्वं। ता पसीददु, भअवदी; परिच्चाहि दुमादो जीवण मरणादो पिअसहीं; तवावि एसा दुहिदाव्वेव (४)।

---

(१) राजाराधनं खलु तातस्य गुरुकं, न पुनर्मालती।

(२) एवं यथा भगवत्या आज्ञप्तं अन्यथा तस्मिन् वरे दुर्दर्शने अतिक्रान्तयौवने, किमिति न विचारितममात्येन?

(३) हा हताऽस्मि समुपस्थितानर्थरूपवज्रपतना मन्दभागिनी!

(४) तत्प्रसीदतु भगवती; परित्रायस्वास्माज्जीवितमरणात्प्रियसखीं; तवाप्येषा दुहितैव।

Digitized by Google

कामं। अयि सरले, किमत्र भगवत्या मया शक्यं। प्रभवति प्रायः कुमारीणां जनयितरि दैवम्। यत्र किलकौशिकी अकुण्ठसखा, दुष्प्रकृतमणिरा: पुरूरवसञ्चकमे, दत्तात्मानविद् आचष्टते; वासवदत्ता च राज्ञे सञ्जयावर्पिता प्रत्तमात्मा नमुदयनाय प्रायच्छदित्यादि। तदपि साहसकल्पमित्यनुपदेष्टव्य एवायमर्थः

राज्ञः प्रियाय सुहृदे सचिवाय कार्य्या,
दत्तात्मजा भवतु निर्वृतिमानमात्यः,
दुर्दर्शनेन घटतामियमप्यनेन,
धूमग्रहेण अग्निनेविमला कलेव।

माल॥ साधुं खलु तातं ॥ हा तात, तुमपि मम नाम एवंविधे सर्व्वथा जितं भोगतृष्णया (१)।

अव। चिरादिदं भगवत्या; एवं भणामि, असुलभशरीरो महाभागो माधवोऽस्मि (२)।

---

(१) हा तात, त्वमपि नाम मम एवमिति सर्व्वथा जितं भोगतृष्णया।

(२) चिरायितं भगवत्या; ननु भणाम्यसुलभशरीरः खलु महाभागोमाधवइति।

Digitized by Google

कामं। गम्यते; वत्से, अनुजानीहि मां।

लवं॥ जनान्तिकं॥ सखि, मालति, संप्रतं भगवत्याः सकाशात्, तस्य महानुभावस्यो[illegible] जानीमः(१)।

माल। सखि, अस्ति मे कौतूहलं(२)।

लवं॥ प्रकाशं॥ भगवति, कएष माधवोनाम, यस्य भगवती स्नेहगुरुकमात्मानं धारयति?(३)

कामं। अप्रस्तावितो महत्येषा कथा।

लवं। तथापि कथयतु, मे भगवती प्रसादं करोतु(४)।

कामं। श्रूयतां; अस्ति विदर्भाधिपतेरमात्यः, समग्रधुर्यपुरुष प्रकाण्डचक्रचूडामणिर्देवरातो नामायमशेषभुवनमहनीयपुण्य महिमानमात्मनस्तनीयं, पितैव ते जानाति, योऽसौ यादृशस्येति। अपिच।

---

(१) सखि, मालति, संप्रतं भगवत्याः सकाशात्, तस्य महानुभावस्योद्गं जानीमः।

(२) सखि, अस्ति ममापि कौतूहलं।

(३) भगवति, कएष माधवोनाम, यस्य भगवती स्नेहगुरुकमात्मानं धारयति?

(४) तथापि कथयतु, मे भगवती प्रसादं करोतु।

Digitized by Google

व्यतिकरितदिगन्ताः श्वेतमानैर्यशोभिः,
सुकृतविलसितानां स्थानमूर्जस्वलानां,
अकलितमहिमानः केतनं मङ्गलानां;
कथमपि भुवनेऽस्मिन् तादृशास्सम्भवन्ति,

माल। सहि, तं क्खु भअवदीसुगहिदणामधेअं सव्वदा तादो सुमरेदि (१)।

सवं। सहि, समं क्खु विज्जाहिगमो कहोत्ति, तक्काल संवेदिणो मन्तअन्ते (२)।

कामं।

ततउदयगिरिरेवैकएव स्फुरितगुणद्युतिसुन्दरः कलावान्,
दृष्टे जगति महोत्सवस्य हेतु र्नयनवतामुदियाय बालचन्द्रः।

सवं॥ अणाणिकं॥ सहि, अवि णाम माहवो भवे (३)।

---

(१) सखि, तं खलु भगवतीसुगृहीतनामधेयं सर्व्वदा तातः स्मरति।

(२) सखि, समं खलु विद्याधिगमः श्रुतइति तत्काल संवेदिनोमन्त्रयन्ते।

(३) सखि, अपि नाम माधवोभवेत्।

Digitized by Google

कामं।

असौ विद्याधारः शिशुरपि विनिर्मत्य भवना
दिहायातः सद्यस्त्वरितकलभस्मरमधुरः;
यदालोकस्थाने भवति पुरमुन्मादतरले,
कटाक्षैर्नारीणां कुवलयितवातायनमिव।

अत्र वासन्तिकया मकरन्देन सह, विद्याधरीलोचनमधि गच्छति; सएव माधवोनामेति।

माल॥ णवरं इमं अणन्तिकं॥ वहि, सुदं तुमए।

सवं। सहि, कुदो वा महोदधिं वज्जिअ पारिआअस्स उप्पत्तीत्ति (१)।

॥ नेपथ्ये भ्रमरध्वनिः॥

कामं। अहो, कालातिपातः सम्प्रति हि!

क्षिपन्निद्रामुद्रां मदनकलहक्केदसुलभा
मवाप्नोत्कण्ठानां विरहमिथुनानां प्रथमतः,
दधानः सौधानामलघुषु निकुञ्जेषु घनता
मसौ सन्ध्याभ्रमरध्वनिरतिभृतः खे विचरति।

---

(१) सखि, कुतो वा महोदधिं वर्जयित्वा, पारिजातस्योद्भवति।

तदुत्तिष्ठामः ॥ इत्युत्तिष्ठन्ति ।

माल ॥ अपवार्य ॥ कथं उवहारीकदम्हि राइणो ताएण; राआराहणं क्खु ताअस्स गुरुअं, ण उण मालदी ॥ सव्वहा ॥ हा ताअ, तुमम्पि णाम मम एव्वंसि, सव्वधा जिदं भोअ तिण्हाए ॥ सामन्दं ॥ कधं महाकुलप्पभवो वि सो महाणु भाओ सुभणिदं पिअसहीए, कुदो वा महोदधीत्यादि पठति । अवि णाम तं पुणोवि पेक्खिस्सं (१)।

सवं । अवलोइदे, इदो एहि, एदिणा सोवाणेण ओदरम्ह(२)।

कामं ॥ अपवार्य ॥ साधु, संप्रति मया तटस्थयैव, मालतीं प्रति निसृष्टार्था दूतीकृत्यस्य, लघूकृतोभारः। तथा हि।

वरेऽन्यस्मिन् द्वेषः, पितरि विचिकित्सा च जनिता,
पुराकल्पोद्गारैरपि च कथिता कार्यपदवी;

---

(१) कथमुपहारीकृतास्मि राज्ञस्तातेन; राजाराधनं खलु तातस्य गुरु, न पुनर्मालती। हा तात, त्वमपि नाम ममैवमिति, सर्व्वथा जितं भोजदृष्णया। कथं महाकुलप्रभवोऽपि समहानु भावः सुभणितं प्रियसख्या, कुतोवा महोदधीत्यादि। अपि नाम पुनरपि तं प्रेक्षिष्ये।

(२) अवलोकिते, इत एहि, एतेन सोपानेनावतराम।

इति द्वितीयोऽङ्कः ॥

Digitized by Google

श्रुतं तन्माहात्म्यं, यदभिजनतो यच्च गुणतः,
प्रसङ्गात् वत्सेत्थं च विधिविधेयः परिचयः।
॥ इति निष्क्रान्तास्सर्वे ॥
इति मालतीमाधवे धवलगृहो नाम द्वितीयोऽङ्कः ॥

Digitized by Google

॥ अथ तृतीयोऽङ्कः ॥

॥ ततः प्रविशति, बुद्धरक्षिता ॥ बुद्ध । परिक्रम्याकाशे ॥ अवलोकयन्ती, अवि जाणासि कहिं भअवदीत्ति ?

॥ प्रविश्य अवलोकिता ॥ बुद्धरक्षिते, किं प्यमुह्यसि? कोवि आलो भअवदीए पिण्डवादवेलं वज्जिअ मालदीं अणुवत्तमाणाए (१)।

बुद्ध । अं; तुमं उण कहिं पत्थिदासि?

अव । अहं क्खु भअवदीए माहवसआसं अनुण्णेसिदा; यन्दिट्ठं अ तस्स, जधा, सक्करघरसम्बद्धं कुसुमाअरं णाम उज्जाणं गदुअ, कुञ्जणिउञ्जपेरन्तरत्तासोअगहणे चिट्ठदु; गदोअ तत्थ माहवो (२)।

बुद्ध । किंति तहिं माहवो अणुण्णेसिदो?

---

(१) बुद्धरक्षिते, किं प्रमुह्यसि? कोपि कालोभगवत्याः पिण्डपातकवेलां वर्ज्जयित्वा, मालतीमनुवर्त्तमानायाः।

(२) अहं खलु भगवत्या माधवसकाशमनुप्रेषिता; यदिष्टञ्च तस्य, यथा, शक्करगृहसंबद्धं कुसुमाकरं नामोद्यानं गत्वा, कुञ्जनिकुञ्जपर्य्यन्तरक्ताशोकगहने तिष्ठतु; गतश्च तत्र माधवः।

Digitized by Google

अव। अज्ज कण्णचउद्दसीत्ति, तत्थ भअवदीए समं मालदी सङ्करघरं गमिस्सदि, तदो किल एवं सोहग्गं वट्टदित्ति; देवदा राहणणिमित्तं सहत्थकुसुमावचअं उद्दिसिअ, सवक्खिआदुदी आं मालदीं, भअवदीजेव्व कुसुमाअरुज्जाणं आणइस्सदि; तदो अणोण्णदंसणं भोदुत्ति। तुमं उण कहिं पत्थिदा? (१)

बुद्ध। अहं क्खु सङ्करघरंजेव्व पत्थिदाए पिअसहीए मदअन्तिआए आमन्तिदा, ता जाव भअवदीए पादवन्दणं करुअ, तहिंजेव्व गच्छामि (२)।

अव। तुमं क्खु भअवदीए जस्सिं पओअणे णिउत्ता, तत्थ को वुत्तन्तो? (३)

---

(१) अद्य कृष्णचतुर्दशीति, तत्र भगवत्या समं मालती शङ्कर गृहं गमिष्यति, ततः किल एवं सौभाग्यं वर्त्तते इति; देवता राधननिमित्तं स्वहस्तकुसुमावचयमुद्दिश्य, सवक्षिकादितीयां मालतीं भगवत्येव कुसुमाकरोद्यानमानेष्यतीति; ततो ऽन्योन्यदर्शनं भवतिति। त्वं पुनः क्व प्रस्थिता?

(२) अहं खलु शङ्करगृहमेव प्रस्थितया प्रियसख्या मदयन्तिकया आमन्त्रिता, ततोयावत् भगवत्याः पादवन्दनं कृत्वा, तत्रैव गच्छामि।

(३) त्वं भगवत्या यस्मिन् प्रयोजने नियुक्ता, तत्र को वृत्तान्तः?

Digitized by Google

बुद्ध । मए क्खु भअवदीए समादेसेण, तासु तासु विस्सम्भकथासु, ईदिसोतारिसोत्ति मअरन्दस्स उवरि पिअसहीए मद्दअन्तिआए दूरं आरोविदो परोक्खाणुराओ ; एसो अ से मणो रहो, अवि णाम तं पेक्खिस्सन्ति (१)।

अव । साधु बुद्धरक्खिदे साधु

बुद्ध । एहि गच्छम्ह

॥ इति परिक्रम्य निष्क्रान्ते ॥ प्रवेशकः ॥

प्रविश्य कामन्दकी ॥

तथा विनयनम्रापि मया मालत्यपाचतः,
नीता कतिपयाहोभिः सखीविस्रम्भसेव्यताम् ।

सम्प्रति ।

प्रजति विरहे वैचित्त्यं, नः प्रसीदति सन्निधौ,
रहसि रमते, प्रीत्या दायं ददात्यनुवर्त्तते;
गमनसमये कण्ठे लग्ना, निरुध्य निरुध्य मां,
सपदि अपथैः प्रत्यावृत्तिं प्रणम्य च याचते।

दृश्यन्तां तत्र साधीयः सम्प्रत्यागमनिवन्धनं ।

---

(१) मया खलु भगवत्याः समादेशेन, तासु तासु विस्रम्भकथासु, ईदृशस्तादृशइति मकरन्दस्योपरि प्रियसख्यामदयन्तिकायादूरमारोपितः परोक्षानुरागः; एषएवास्यामनो रथो, ऽपि नाम तं प्रेक्ष्ये इति ।

Digitized by Google

शाकुन्तलादीनितिहासवादान्प्रस्तावितान्यपरैर्वचोभिः,
श्रुत्वा मदुत्संगनिवेशिताङ्गी चिराय, चिन्तास्तिमितत्वमेति।
तदद्य माधवसमक्षमुत्तरमुत्कमिष्यामि॥ नेपथ्याभिमुखं॥
वत्से, इत इतः।

॥ ततः प्रविशति, मालती लवङ्गिका च॥

माल॥ स्वगतं॥ कथं उवहारीकदत्तीत्यादि पूर्वोक्तं पठति॥

लवं। सहि, एसो क्खु मउरमउरसारङ्गमञ्जरीकवलणकेलिकलकोइलकुलकोलाहलाकुलिदसहआरंसिहरट्ठीण चटुलचञ्चरीअणिअरव्वदूअरहलिददलकरालचम्पआहिवासमणोहरो, मरालमंसलजहणपरिणाहुव्वहणमन्थरोरुभर विसंठुलखलिदचलणसंचारमसिणगमणोपणीदसेअसीअरसुधाविंदुरुज्जन्तमुद्धमुहचन्दचन्दणाअमानसीअलफ्फरसो, तुमं परिस्सअदि कुसुमाअरुज्जाणमारुदो; ता पविसन्तु (१)।

---

(१) सखि, एष खलु मधुरमधुरसारङ्गमञ्जरीकवलनकेलिकलकोकिलकुलकोलाहलाकुलितसहकारशिखरोड्डीनचटुलचञ्चरीकनिकरव्यतिकरोद्धूतिदरकरालचम्पकाधिवासमनोहरो, मरालमांसलजघनपरिणाहोद्वहनमन्थरोरुभरविसंष्ठुलस्खलितचरणसञ्चारमसृणगमनोपनीतखेदशीकरसुधाविन्दुयमानमुग्धमुखचन्द्रचन्द्रनायमानशीतलस्पर्शां परिष्वजति कुसुमाकरोद्यानमारुतस्तदुपविशावः।

Digitized by Google

॥ इति परिक्रम्यो विश्रतः ॥

॥ ततः प्रविशति माधवः ॥

माधवः ॥ सहर्षं ॥ हन्त परागता भगवती; दृष्टं हि मम
आविर्भवन्ती प्रथमं प्रियायाः सोच्छ्वासमन्तःकरणं करोति ।
सन्तापदग्धस्य शिखण्डिपूनोर्दृष्टेः पुरस्तादचिरप्रभेव ।

॥ दृष्ट्वा ॥ अये सवङ्किकादितीया मालत्यपि ।

आसन्नमुत्पलदृशोवदनामलेन्दु
सान्निध्यतो मम मुहुर्जडिमानमेत्य ।
जाड्येन चन्द्रमणिनेव महीधरस्य
सन्धार्यते द्रवमयो मनसा विकारः ।

सम्प्रति रमणीयतरा मालती ।

ज्वलयति मनोभवाग्निं, मदयति हृदयं, हृतार्थयति चक्षुः,
परिस्फुटितचम्पकावलीविलासबलुलितालसैरङ्गैः ।

माल । सखि, इमस्मिं कुंजणिउंजे कुसुमाइं अवचिणह्म (१) ।

माध ।

प्रथमप्रियावचनसंश्रवस्फुरत्पुलकेन संप्रति मया विडम्ब्यते,
जनराजिनूतनपथस्मुच्चणचणबद्धकुड्मलकदम्बडम्बरः ।

---

(१) सखि, एतस्मिन् कुञ्जनिकुञ्जे कुसुमान्यवचिनुवः ।

Digitized by Google

लवं। यहि, एवं करेह्म (१)

॥ पुष्पावचयं नाटयतः ॥

माध। अपरिभेयास्तूर्य्यमाचार्य्यकं भगवत्याः।

माल। यहि, इदोवि अम्हिं अवचिणह्म (२)।

कामं॥ मालतीं परिष्वज्य॥ अयि, विरम, निस्सहाया जातासि। तथाहि।

स्खलयति वचनं ते, संभ्रमत्यङ्गमङ्गं,
जनयति मुखचन्द्रोद्भासिनः खेदबिन्दून्;
मुकुलयति च नेत्रं, सर्व्वथा, सुभ्रु, खेद
स्तयि विलसति, तुल्यं वल्लभालोकनेन।

॥ मालती लज्जते॥

लवं। सोहणं भअवदीए आणत्तं (३)।

माध। हृदयंगमः परिहासः।

कामं। तदास्तां, किञ्चिदास्थेयमाख्यातुकामासि।

॥ सर्व्वा उपविशन्ति॥

कामं॥ मालत्यास्चिबुकमुन्नमय्य॥ शृणुविचिन्तितं, सुभगे।

माल। अवहिदम्हि।

कामं। अस्ति तावदेकदा प्रसंगतः कथितएव माधवा भिधानकुमारो नाम, यस्तमिव मामकीनस्य मनसो द्वितीयं निबन्धनं।

लवं। सुमरामो।

Digitized by Google

कामं। स खलु मन्मथोद्यानयात्रादिवसात्प्रभृति, दुर्ल्लक्ष्यमाणः, परवानिव शरीरोपतापेन।

यदिन्द्रावानन्दं, प्रणयिनि जने वा, न भजते,
व्यनक्त्यन्तस्तापं तदयमपि धीरोऽपि विषमं;
प्रियक्रुञ्चामाकृप्रकृतिरपि, चापाच्छुमधुरं
वपुः, क्षामं क्षामं वहति, रमणीयस्य भवति।

सवं। एवम्पि तस्सिं अवसरे भअवदीं तुवराअन्तीए, अवलोइदाए उद्दीरिदं आसि, जधा अल्लत्थसरीरो माहवो वेत्ति (१)।

कामं। यावदभ्युपायं, मालत्येवास्य मन्मथोन्माथे हेतुरिति ममापि सएव निश्चयः।

अनुभवं वदनेन्दुरुपागमन्नियतमेव यदस्य महात्मनः,
क्षुभितमुत्क्षिकातरलं मनः, पयइव स्निमितस्य महोदधेः।

माध। अहो, उपन्यासपटुद्धिः; अहो महत्त्वारोपणे यत्नः। अथवा।

आस्येषु निष्ठा, सहजस्य बोधः, प्रागल्भ्यमभ्यस्तगुणा च वाणी,
कान्तानुरोधः, प्रतिभानवत्त्वमेते गुणाः कामदुघाः स्त्रियासु।

---

(१) एवमपि तस्मिन्नवसरे भगवतीं त्वरयन्त्या अवलोकितयोद्दीरितमासीत्, यथा अल्पस्थशरीरो माधवइति।

कामं। अतस्तेन जीवितादुद्विजमानेन दुष्करमपि न किञ्चित् क्रियते। अथोच्यते

धत्ते चञ्चुर्मुकुलिनि रणत्कोकिले वालचूते,
मार्गे गात्रं क्षिपति वकुलामोदगर्भस्य वायोः;
दाहप्रेक्षा सरसविसिनीपत्रमाचान्तराय
स्नाम्यन्मूर्त्तिःअयति वडवो मृत्यवे चक्रपाद्यान्।

माध। अन्यएवायुषः कथाप्रकारो भगवत्याः।

माल॥ स्वगतं॥ अदिदुक्करं करेदि।

कामं। तदेवं प्रकृत्या सुकुमारः कुमारः, कदाचिदप्य न्यचापरिक्षिप्तपूर्व्वसपत्नी, यतोऽधुना मकरमनेन मरणमप्य नुभवितुं।

माल॥ जनान्तिकं॥ सहि, अत्तणो कारणादो तस्सु सव्व लोआलङ्कारभूदस्सु, किम्पि आसङ्कंतीए भअवदीए भीदा विअस्सि; ता किं दाणिं एत्थ पडिवज्जिस्सं (१)।

माध। दिष्ट्यानुकम्पितोऽस्मि भगवत्या।

---

(१) सखि, आत्मनः कारणादेतस्य सर्व्वलोकालङ्कार भूतस्य, किमपि आशङ्कमानया भगवत्या भीतायितास्मि; तत् किमिदानीमत्र प्रतिपत्स्ये।

Digitized by Google

अवं। भअवदी एवंवादिणीत्ति आअक्खीअदि; अम्हाणं वि भट्टिदारिआ, भवणाअरच्छामुहमुहुत्तमण्डणस्स, तस्सेव्व वड्ढओ अणुभूददंसणा भविअ, रविकिरणाश्लिट्ठमुद्ध कमलिणीकन्दसुन्दरावअवसोहाविभाविदाणङ्गवेअणा अधि अदररमणीआवि, परिअणं दूणेदि। णाभिणंदन्ति केलिकलाओ, केवलं कमलाअमाणकन्तहत्थपज्जन्तगण्ड मण्डला दिअसांइ गमेदि।

अविअ। विअसिआरविन्दमअरन्दणिस्सन्दसुन्दरेण, दरदलिदकुन्दमाअंदमउविंदुसन्दोहवाहिणा, मअणुज्जाण परम्मारुदेण, उत्तम्भदि (१)।

---

(१) भगवती, एवंवादिनीत्याख्यायते; अस्माकमपि भर्तृ दारिका, भवनाकरस्थामुखमुहूर्त्तमण्डनस्य, तस्यैव वटुकस्यानु भूतदर्शना भूत्वा, रविकिरणाश्लिष्टमुग्धकमलिनीकन्दसुन्दरा वयवशोभाविभावितानङ्गवेदनाधिकतररमणीयापि, परिजनं दुनोति। नाभिनन्दति केलिकलाः केवलं कमलायमानकान्त हस्तपर्य्यन्तगण्डमण्डला दिवसानि गमयति।

अपिच। विकसितारविन्दमकरन्दनिस्यन्दसुन्दरेण, दरदलितकुन्दमाकन्दमधुविन्दुसन्दोहवाहिना, मदनोद्यान पर्य्यन्तमारुतेनोत्ताम्यति।

अण्णं च। जेण तस्सिं जत्ताहिअहे, णिअमहूसवमहणुद्दंसणपडिवण्णरूवस्स भअवदो कामस्स विअ, णिअकाणणालङ्कार आरिणो, तस्स विविहविब्भमाभिरामं अणुरूआणुराआणुबन्ध महग्घोकिदजोव्वणारम्भं अण्णोण्णदिट्ठिविणिवादवञ्चणावसरजूर विदचित्ततुवरंतकोदूहलं, समुल्लसिदसद्धसत्थम्भमंथरावअव डिअम्मसेअपुलअउक्कंपसुंदरं, आणंदिदसही अणं, पिअसही ए परस्परावलोअणसुहं समासादिदं; तदो पहुदि, सविसेस दूसहाआसविब्भमाणूहामदेहदाहदारुणं दसापरिणामं अणुभवन्ती, मुहुत्तमेत्तसम्पत्तपुण्णचन्दोदआ वालकमलिणी विअ पम्हलाअदि (१)।

---

(१) अन्यच्च। येन तस्मिन् यात्रादिवसे, निजमहोत्सवमहाहुत दर्शनप्रतिपन्नरूपस्य भगवतः कामस्येव, निजकाननालङ्कारकारिणस्तस्य, विविधविभ्रमाभिराममनुरूपानुरागानुबन्धमहार्घीकृतयौवनारम्भमन्योन्यदृष्टिविनिपातवञ्चनावसरखिद्यमानचित्तत्वरमाणकौतूहलं, समुल्लसितसाध्वसस्तम्भमन्थरावयवप्रतिलग्नस्वेदपुलकोत्कम्पसुन्दरं, आनन्दितसखीजनं, प्रियसख्या परस्परावलोकनसुखं समासादितं; ततःप्रभृति, सविशेषदुःसहाशयविजृम्भमाणोद्दामदेहदाहदारुणं दशापरिणाममनुभवन्ती मुहूर्त्तमात्रसम्प्राप्तपूर्णचन्द्रोदया वालकमलिनीव म्लायति।

Digitized by Google

तथाविध। मुहुर्त्तमेत्तहिअअविणिहिदणिम्मीअंतवल्लहस
मागमा, णिब्भरसलिलासारसिच्चमाणणिव्वावसाणमेदणीव्व
सीदलाअदित्ति जाणामि। जेण सा, पप्फुरिदकन्तदसणछदु
क्कलंतदन्तमुत्तिआवलिकंतिसविसेससोहिदं, णिरन्तरुल्लसिद
पुलअपल्लवकवोलघोलन्तसंदद्दाणंदवाहत्तवभंरुसविब्भमिद
णिस्सन्दमन्दतारुत्ताणमसिणमउलाअन्तणेत्तणीलुप्पलं, अविर
लुल्लिसेअजलविन्दुसुंदरललाटपट्टं, णवचंदलेहामणोहरं मुद्ध
मुहपुंडरीअमुव्वहंती, विअडुसहअरीचित्तसंदद्दकुमार
भावा भोदि (१)।

---

(१) तथापि च। मुहूर्त्तमात्रहृदयविनिहितनिर्म्मीयमाण
वल्लभसमागमा निर्भरसलिलासारसिच्यमानघनीभावसानमेदि
नीव प्रीतलायतदृति जानामि। येन सा, प्रस्फुरत्कान्तदशनछदो
त्कलद्दन्तमौक्तिकपङ्क्तिकान्तिसविशेषशोभितं, निरन्तरोल्लसित
पुलकपल्लवकपोलघूर्णमानसंतानन्दवाष्पस्तवकमीषदिकसि
तनिस्यन्दमन्दतारोत्तानमसृणमुकुलायमाननेत्रनीलोत्पलं,
अविरलोल्लिखखेदजलविन्दुसुन्दरललाटपट्टं, नवचन्द्ररेखा
मनोहरं, मुग्धमुखपुण्डरीकमुद्वहन्ती विदग्धसहचरीचित्तसं
भ्रमितकौमारभावा भवति।

Digitized by Google

किंञ्च। उद्दामसिसिरससिकरणिउरंबचुंविदपउत्तिणीसं
दचंदमणिहारधारिणी, पउरकप्पूरपूरसविसेससिसिरचंदण
रसछडासारणिभरदन्तुरिदवालकन्दलीवत्तसम्बाहणादिवा
वारतुवरंतसहअरीसत्थविरइदोवणीदकमलिणीदलजलद्दा
सअणीए उल्लिद्दा, रअणीओ गमेदि।

कधंविअ उवलद्धणिद्दासुहा खेअपरूढिदपादपल्लवुव्वंतपिण्डा
लत्तअरसा थरथराअमाणपीवरोरुमूलवासविसंठुलणीविबं
धणा उक्खडंतहिअअल्लरुत्तरंगणीसासविसमसमूसअन्तपच्च
लपओहरोवरि णिहितवेवन्तभुअलदावेट्ठबन्धणा (१)।

---

(१) किञ्च। उद्दामशिशिरशशिकरनिकुरम्बचुम्बितप्रवृत्त
निस्यन्दचन्द्रमणिहारधारिणी, प्रचुरकर्पूरपूरसविशेषशिशिर
चन्दनरसछटासारनिकरदन्तुरितबालकन्दलीपत्रसंवाहनादि
व्यापारलरमाणसहचरीसार्थविरचितोपनीतबालकमलिनीद
लजलार्द्रशयनीये उन्निद्रा, रजनीर्गमयति।

कथमप्युपलब्धनिद्रासुखा खेदप्ररूढपादपल्लवोद्वान्तपि
ण्डालक्तकरसा, थरथरायमाणपीवरोरुमूलवासविसंष्ठुलनी
विबन्धना, उत्खण्ड्यमानहृदयान्तरोत्तरङ्गनिश्वासविषमसमु
च्छ्वसत्पत्रलपओधरोपरिनिहितवेपमानभुजलतावेष्टबन्धना,

अणिच्चिपडिबोधवेलाविसज्जिदुव्विग्गदिट्ठिवादविसादसुसण्ण
खिज्जसंजादमोहमीलन्तलोअणा, सअलजणसहीअणपउत्तपडि
वण्णमुक्काविच्छेअसमअसंगलिददीहणीसासणेसजीविदा; किंका
दव्वमूढदाए पढमपत्थिदणिअजीविदावसाणं।

दुव्वारदेव्वविलसिदोवालंभमेत्तवावारं अणारिअं जणं
करेदि; ता पेक्खदु भअवदी; एदेसु दाव लावण्णभूदट्ठणिम्माण
परिवेल्लवेसु अङ्गेसु दारुणविअंभिदस्स कियच्चिरं कुसलाव
साणदा मन्मधस्स भविस्सदि। कधंअ एदाइं रमणकेलिकलह
कोवोवराअपल्लविदकेरलीकवोलकोमलुल्लेखणविसअचंदचंदि
आउद्दामदलिदतिमिरावरणाइं विभावरीमुहाइं (१)

---

(१) अटिति प्रतिबोधवेलाविसर्जितोद्विग्नदृष्टिविनिपातविशीर्ण
शून्यप्रणयीजनसञ्जातमोहमीलल्लोचना, सकलजनसखीजनप्रय
त्नप्रतिपन्नमूर्च्छाविच्छेदसमयसंगलितदीर्घनिश्वासशेषजीविता
किंकर्त्तव्यमूढतया प्रथमप्रार्थितनिजजीविताद्यावसानं।

दुर्व्वारदैवविलसितोपालम्भमात्रव्यापारमसाधुजनं क
रोति; तन्नेच्छतां भगवती; एतेषु तावल्लावण्यभूयिष्ठनिर्म्माण
परिपेलवेष्वङ्गेषु दारुणविजृम्भितस्य कियच्चिरं कुशलावसा
नता मन्मथस्य भविष्यति। कथञ्च एतानि रमणके
लिकलहकोपोपरागपल्लवितकेरलीकपोलकोमलोल्लेखनविसर
पच्चिकोद्दामदलिततिमिरावरणानि विभावरीमुखानि।

Digitized by Google

दमे अ उल्लसिदद्दुद्धसिन्धुपूरधवलुज्जलजोण्हाजलप्पक्खालिद गअणांगणा परिमलिदपाटलाउलणिम्महणवहलपरिमलुग्गार सम्वलणमसिणमंसलाअन्तमलअमारुद्दुद्धाविददहदिहमुहा वसन्तरअणीपरिणाहा अणत्थकारिणो भविस्संति पिअवही एत्ति (१)।

कामं। लवङ्गिके

यदि तद्विषयोऽनुरागबन्धः स्फुटमेतद्विफलं गुणज्ञताया:,
इति नन्दितमप्यवस्थया स्वाद्धृदयं दारुणया विदार्य्यते मे।

माध। खाणएव इलासोभगवत्या:।

कामं। अहो प्रमाद:।

प्रकृतिखलितमेतल्लोकुमार्य्यैकसारं,
वपुरयमपि सत्यं दारुण: पञ्चबाण:,
खलितमलयवातोद्भूतचूतप्रसून:,
कथमयमपि कालस्तारचन्द्रावतंस:।

---

(१) एते च उल्लसितदुग्धसिन्धुपूरधवलोज्ज्वलज्योत्स्नाजलप्रक्षालितगगणांगणा: परिमलितपाटलाकुलनिर्मथनवहलपरिमलोद्गारसंवलनमसृणमांसलायमानमलयमारुतोद्भावितदग्धदिङ्मुखावसन्तरजनीपरिणाहा अनर्थकारिणो भविष्यन्ति प्रिय सखादिति।

Digitized by Google

लवं। अवरञ्च ज्ञातिदं भोदु भअवदीए। एदं माहवपडिच्छंदअणाहं चित्तफलअं॥ मालत्या स्वनांशुकमपनीय दर्शयति॥ एषापि तस्यैव सहस्तविरचितेति कण्ठावलम्बिता वकुलमाला जीवितं प्रियसखीति (१)।

माध॥ सखृहं॥

जितमिव भुवनं त्वया यदस्या, सखि वकुलावलि, वल्लभाभिजाता,
परिणतविषकाण्डपाण्डुमुग्धस्तनपरिणाहविलासवैजयन्ती।

नेपथ्ये। कलकलः॥ सर्वे आकर्णयन्ति॥ पुनर्नेपथ्ये॥

रे रे संकरघराधिवासिणो जणवदा, सो क्खु जोव्वणारम्भगब्भसंभरिददुव्विसहामरिसरोसव्वदिअरवलामोडिविहडिदुद्धाडिदलोहपञ्जरणिबद्धविसिङ्खलाणिरोहपडिभङ्गसंकुडिदणिअलीलाविलासपेरन्तुद्देसन्तवहसुत्तंगसंगूढविअडवेअग्गंथिआडम्ब

---

(१) अन्यच्च ज्ञातं भवतु भगवत्या। एतन्माधवप्रतिच्छन्दकसनाथं चित्रफलकं। एषापि तस्यैव सखीस्वविरचितेति कण्ठावलम्बिता वकुलमाला जीवितं प्रियसखीरिति।

(२) रे रे शङ्करगृहाधिवासिनो जनपदा; एष खलु यौवनारम्भगर्भसंभृतदुर्विषहामर्षरोषव्यतिकरबलात्कारविघटितोद्घाटितलोहपञ्जरप्रतिबन्धशृङ्खलानिरोधप्रतिभङ्गसङ्कु

Digitized by Google

रुद्दामसरीरसन्निवेसो, मठादो अवक्कमिअ, तक्खणपडिवाइअ
वलिदाणेअदेहिदेहावयवमज्झणिट्ठुरअत्तिखण्डट्टहारकडक
डाअन्तकरवत्तकठिणदंठाकरालमुहकंदरो, पअंडवज्जणि
ग्घादद्दारुणपेडाभोडणकवलिदाणेअणरतुरङ्गमंसुग्गार
भरिदमसगुहामज्झगभीरघग्घरोरणिग्गरन्तसद्दसंदब्भपडि
रवाभोअभीसिदजइविट्ठाविदासेसजणणिवहो, कठोरणह
कप्परक्कमणिद्दअदारिदअम्बुगत्तावअवप्पउत्तरत्तकद्दमि
अमग्गवहो, दुट्ठसद्दूलो, कुविअकअन्तलीलादद्दं करेदि। ता
रक्खध अधाअन्तीए पिअसहीए मदअन्तिआए जीविदंति,

खितमिअलीलाविलासपर्य्यन्तोदेशदुच्छलदसृक्चुलुकाङ्कूल
विकटवैजयन्तिकाकलेवरोद्दामशरीरसन्निवेशो, मठादपक्रम्य,
तत्क्षणप्रत्यूहवलितानेकदेहिदेहावयवमध्यनिष्ठुरास्थिखण्ड
द्वारकटकटायमानकरपत्रकठिनदंष्ट्राकरालमुखरकन्दरः,
प्रचण्डवज्रनिर्घातदारुणपेटाभोटनकवलितानेकनरतुरङ्ग
मांसोद्गारभरितमांसगुहामध्यगभीरघर्घरोरणिर्गलरवप्र
त्यूहसन्दर्भप्रतिरवाभोगभीषितयदृच्छाविताशेषजननिवहः, क
ठोरनखरकर्परारक्रमणनिर्दयदारितजन्तुगात्रावयवप्रवृत्तर
क्तकर्दमितगतिपथो, दुष्टशार्दूलः, कुपितकृतान्तलीलायितं
करोति। तद्वत यथाऽसौ प्रियसखी मदयन्तिकाजीवित
मिति।

॥ प्रविश्य बुद्धरक्षिता सभयं ॥ परित्रायध्वं; एषा नो प्रियसखी अमात्यनन्दनस्य भागिनी मदयन्तिका, एतेन दुष्टशार्दूलेन विनिहतविद्राविता, शेषपरिजनाभिभूयते (१)।

माल। सवक्तिए, अहो अमादो (२)।

माध॥ ससंभ्रममुत्थाय॥ बुद्धरक्षिते, क्वासौ।

माल॥ दृष्ट्वा सहर्षसाध्वसं आत्मगतं॥ अम्महे; एसोवि अत्थञ्जेव (३)।

माध॥ स्वगतं॥ हन्त, पुण्यवानसि, यदस्मत्कृतोपनतदर्शनोल्लसितलोचनयामया।

अविरलमिव दाक्षा पोक्षरीकेण गन्धैः,
क्षपितदव च दुग्धस्रोतसां निर्भरेण,
कवलितदव क्षत्क्षत्तुषा क्षारितेन,
प्रसभमहृतवर्षेणेव साम्रेण सिक्तः।

---

(१) परित्रायध्वं; एषा नः प्रियसखी अमात्यनन्दनस्य भागिनी मदयन्तिका, एतेन दुष्टशार्दूलेन विनिहतविद्राविता, शेषपरिजनाभिभूयते।

(२) सवक्तिके अहो प्रमादः।

(३) आश्चर्यं; एषोऽपि अत्रैव।

Digitized by Google

बुद्ध। महाभाग, उद्यानवाटिरत्यामुखे (१)।

॥ माधवः सादोपं परिक्रामति ॥

कामं। वत्स, अप्रमत्तो भूत्वा विक्रमस्व।

माल ॥ अनार्त्तिकं ॥ सवक्लिए; हद्धी, हद्धी, संसज्जसु आदो (२६)।

॥ सर्व्वाक्षरितं परिक्रामन्ति ॥

माध ॥ अये हन्त सवीभत्सं ॥ अहह!

संसक्तुटितविवर्त्तिताजाजव्याकीर्णस्फुरदपदृष्टरण्डखण्डः, कीलालव्यतिकरगुरुस्फदन्नपङ्कः प्राचण्ड्यं वहति नखायुधस्य मार्गः।

अहो प्रमादः।

वयं वत विदूरतः; क्रमगता पशोः कन्यका।

सर्व्वाः। हा भद्रक्लिए।

कामन्दकीमाधवौ ॥ सहर्षाकूतं॥

कथं तदभिपातितादधिगतायुधः पूरुषात्;

कुतोऽपि मकरन्दएत्य सहसैव मध्ये स्थितः।

इतराः। साधु, महाभाग, साधु।

कामन्दकमाधवौ।

॥ सभयं॥ दृढं च पशुना हतः।

---

(१) महाभाग, उद्यानवाटिरत्यामुखे।

(२) सवक्लिके, हा धिक् संशयः खलु जातः।

Digitized by Google

दूतराः। अघाहिदं, अघाहिदं।

कामन्दकीमाधवौ ॥ सहर्षं ॥ प्रमथितस्य दंष्ट्रायुधः।

दूतराः ॥ सानन्दं ॥ दिट्ठिआ पडिहदं दुज्जादं (१)।

कामं ॥ साकूतं ॥ कथं व्यालनखरप्रहारनिःसृतरक्तप्रवाहः, क्षितितलनिषक्तखड्गलतावष्टम्भनिश्चलः, संभ्रान्तमदयन्निकाव लम्बितस्याम्यतीव वत्सो मे मकरन्दः।

दूतराः। हद्धी, हद्धी, गाढप्पहारदाए किलम्मदि महा भाओ (२)।

माध। कथं प्रमुग्धएव ॥ कामन्दकीं प्रति ॥ भगवति, मां परित्रायस्व।

कामं। अतिकातरोऽसि; तदेहि तावत्पश्यवः।

॥ इति परिक्रम्य निष्क्रान्ताः सर्वे ॥ इति मालतीमाधवे भार्दूलविद्रावणोनाम तृतीयोऽङ्कः।

---

(१) दिष्ट्या प्रतिहतं दुर्जातं।

(२) हा धिक्, हा धिक्, गाढप्रहारतया क्लाम्यति मकरन्दः।

Digitized by Google

अथ चतुर्थोऽङ्कः।

ततः प्रविशतो मदयन्तिकालवङ्गिकाभ्यामवलम्बितौ प्रमुग्धौ माधवमकरन्दौ। संभ्रान्ता कामन्दकी मालती बुद्धरक्षिता च।

मदयन्तिका। पसीद, भअवदि; परित्ताहि, परित्ताहि, मदयन्तिआणिमित्तसंवड्ढजीविदं विवण्णजणाणुकंपिणं महाभागं (१)।

इतराः। हद्धी, हद्धी, किं दाणिं अम्हेहिं एत्थ पेक्खिदव्वं (२)।

उभौ। कमण्डलूदकेन धिक्का॥ ननु भवत्यः पटाञ्चलेन वत्सौ वीजयन्तु।

॥ मालत्यादयस्तथा कुर्व्वन्ति॥

मक। समाश्वसितावलोकय च॥ वयस्य, कातरोऽसि; किमेतत्, ननु स्वस्थएवास्मि।

मद॥ सहर्षं॥ अम्महे, पडिबुद्धं दाणिं मअरंदपुण्णिमाअं देण। (३)।

---

(१) प्रसीद भगवति; परित्रायस्व, परित्रायस्व, मदयन्तिकानिमित्तसंवर्धितजीवितमापन्नजनानुकम्पिनं महाभागं।

(२) हा धिक्, हा धिक्, किमिदानीमस्माभिरत्र प्रेक्षितव्यं।

(३) आश्चर्य्यं, प्रतिबुद्धमिदानीं मकरन्दपूर्णिमाचन्द्रेण।

Digitized by Google

॥ मालती माधवस्य ललाटे हस्तं दत्वा ॥ सहि लवङ्गिए, दिट्ठिआ वड्ढसि; णं भणामि, पडिबुद्धोज्जेव्व दे पिअवअस्सो, पडिवण्णचेअणो महाभाओ मअरन्दोत्ति (१)।

माध॥ आअस्स॥ वअस्स, साहसिक, एह्येहि॥ दृष्ट्यालिङ्गति॥

कामं॥ उभौ शिरस्याघ्राय॥ दिट्ठ्या जीवितवत्सासि।

इतरा:। पिअं पिअं णो संवुत्तं (२)।

॥ सर्व्वा हर्षं नाटयन्ति॥

बुद्धु॥ जनान्तिकं॥ सहि मदअन्तिए, एसोज्जेव सो (३)।

मद। तदेव ज्ञातमेतया मया यथा एष साधवो, अयमपि सो जणेत्ति (४)।

बुद्धु। अद्द, सच्चवादिणी अहं।

---

(१) सखि लवङ्गिके, दिष्ट्या वर्द्धसे; ननु भणामि, प्रतिबुद्ध एव ते प्रियवयस्य:, प्रतिपन्नचेतनो महाभागो मकरन्दइति।

(२) प्रियं प्रियं न: संवृत्तं।

(३) सखि मदयन्तिके, एष एव स:।

(४) सर्व्वं ज्ञातमेव मया, यथा एष महाभागो माधव:, अयमपि स जनइति।

Digitized by Google

मदं। ण क्खु अण्णारिसेसु तुल्लारिसीओ पक्खवादिणीओ होन्ति ॥ माधवमवलोक्य ॥ सहि, मालदीएवि रमणीओ दूमस्सिं महाणुहावे अणुराअप्पवादो (१) ॥ पुनर्मकरन्दमेव सस्पृहमवलोकयति ॥

कामं॥ स्वगतं ॥ रमणीयोर्ज्जितं हि मदयन्तिकामकरन्दयोर्दैवादद्य दर्शनं ॥ प्रकाशं॥ वत्स मकरन्द, कथं पुनरायुष्मान स्मिन्नवसरे मदयन्तिकाजीवितत्राणहेतोर्भगवता दैवेन सन्निधापितः।

मक। अद्याहमन्तर्नगरएव कांश्चिदार्त्तामुपश्रुत्य, माधवस्य चित्तोद्वेगमधिकमाशङ्कमानस्त्वरितमवलोकितानिवेदितकुसुमाकरोद्यानवृत्तान्तः, परापतमेव ग्रार्दूलावस्कन्दगोचरगतामेतामभिजातकन्यकामभ्युपपन्नवानस्मि।

॥ मालतीमाधवौ विस्मयतः ॥

कामं॥ स्वगतं॥ वृत्तेन खलु मालतीप्रदानेन भवितव्यं ॥ प्रकाशं॥ वत्स माधव, दिष्ट्या सदृशा वर्द्धितोसि, मालत्याः तदयमवसरः प्रीतिदायस्य।

---

(१) न खल्वन्यादृशेषु युष्मादृश्यः पक्षपातिन्योभवन्ति। सखि मालत्यामपि रमणीयएवास्मिन् जनेऽनुरागप्रवादः।

Digitized by Google

माध। भगवति दूयंहि।

यदाज्ञप्तिसुहृत्प्रमोदमुखं योजन्यादिहितवती गतव्यथं मां, तत्कामं प्रभवति पूर्वपाचदृत्या स्वीकर्तुं मम हृदयञ्च जीवितञ्च।

सवं। पडिहिदो खु णो पिअसहीए अअं पसादो (१)।

मद॥ खगतं॥ आणादि महाभागधेओ अणोअवसरे रमणीअं मंतिदुं (२)।

माल॥ खगतं॥ किं णाम मअरंदेण उव्वेअआरणं सुदं भविस्सदि (३)।

माध,। वयस्य कथं पुनर्ममाधिक्योद्वेगहेतुवार्त्ता?

॥ प्रविश्य॥

पुरुषः। वत्से मदयन्तिके, भ्राता ते ज्यायानमात्यनन्दनः समादिशति; अद्य परमेश्वरेणास्मद्भवनमागत्य, भूरिवेलोत्परि परं विश्वासमस्मासु च प्रसादमाविष्कुर्व्वता, स्वयमेव प्रतिपादिता मालती; तदेहि सम्भावयामः प्रमोदमिति।

मक। वयस्य सेयं वार्त्ता॥

॥ मालतीमाधवौ वैचित्र्यं नाटयतः॥

---

(१) प्रहृष्टः खलु नः प्रियसखा अयं प्रसादः।

(२) जानाति महाभागधेयोजनोऽवसरे रमणीयं मन्त्रितुं।

(३) किं नाम मकरन्देनोद्वेगकारणं श्रुतं भविष्यति।

Digitized by Google

मद। मालतीं सहर्षमालिङ्ग्य॥ सखि मालति, तुमं क्खु एक्कणअरणिवासेण सह पंसुकीलणादोपभुदि मे पिअसही आसि वहिणिआ अ सम्पदं, उण णो घरस्स मण्डणं जादासि (१)।

कामं। वत्से मदयन्तिके, दिष्ट्या वर्द्धसे भ्रातुर्मालती लाभेन।

मद। भअवदि तुह्माणं आसिसाभप्पहावेण, सखि लवङ्गिए फलिदा णो मणोरहा तुह्माणं लाहेण (२)।

लवं। सखि अह्माणंपि किं अत्थि मन्तिदव्वं (३)।

मद। एहि बुद्धरक्खिदे, दाणिं विवाहमङ्गलवं सम्भावेम्ह (४)।

बुद्ध। सखि गच्छह्म॥ इत्युत्तिष्ठतः॥

---

(१) सखि मालति, खल्वेकनगरनिवासेन सहपांशुक्रीडनात् प्रभृति मे प्रियसखी आसीः भगिनिका च साम्प्रतं पुनर्नो गृहस्य मण्डनं जातासि।

(२) भगवति युष्माकभाशीःप्रसादेन सखि लवङ्गिके फलिता नोमनोरथा युष्माकं लाभेन।

(३) सखि किमस्माकमर्थेनमन्त्रयितव्यं।

(४) एहि बुद्धरक्षिते, विवाहमहोत्सवं सम्भावयावः।

Digitized by Google

खवं ॥ अनान्तिकं ॥ भअवदि, अधा एदे हिअअभरिदुल्लिक्त विस्सआणंदसुन्दरांदोलिदधीरत्तणमणोहरा, पडत्तणिं मदअन्तिआ मअरन्दाणं दरदलिदनीलुप्पलदामसरिच्छा क डक्खा, विक्खेवातह तक्केमि मणोरहणिव्वुत्तसंबन्धा एदेत्ति (१)।

कामं ॥ विहस्य ॥ ननु दूरमौ विलोकनेन मानसं मुहुर्मुहुः प्रमोदमनुभवतः।

तथाहि।

दूषयन्तिर्यमलितविषमं कुञ्चितप्रान्तमेत
त्प्रेमोद्भेदस्खलितपुलकं किञ्चिदारेचितभ्रु,
अन्तर्मोदानुभवमसृणं लक्ष्मनिष्कम्पपक्ष्म
व्यक्तं मंस्यत्यचिरमनयोर्दृष्टमाकेकराक्षं।

सत्पुरुषः दूत, दूतः।

मद। सद्धि बुद्धरक्खिदेअवि णाम पुणो, वि दाव दीसदु एस जीविदप्पदो पुण्डरीअलोअणो (२)।

---

(१) भगवति यथा एते हृदयभरितोद्गतविस्मया नन्दसुन्दरान्दोलितधीरत्वमनोहराः परिवर्त्तन्ते मदयन्ति कामकरन्दयोर्दरदलितनीलोत्पलदामसदृक्षाः कटाक्ष विक्षेपाःतथा तर्कयामि मनोरथनिर्वृत्तसम्बन्धावेताविति।

(२) सद्धि बुद्धरक्षिते अपि नाम पुनरपि तावत् पश्यतु सजीवितप्रदः पुण्डरीकलोचनः।

Digitized by Google

बुद्धु। जइ दैवमणुकूलं भविस्सदित्ति (१)।

॥ पुरुषेण निष्क्रान्ते॥

माध॥ अपवार्य्य॥

चिरादाशातन्तुस्खुटतु विषिनीसूचभिदुरो,
महानाधिव्याधिर्निरवधिरिदानीं प्रसरतु,
प्रतिष्ठामव्याजं व्रजतु मयि पारिप्लवधुरा,
विधिः स्वास्थ्यन्वत्तां, भवतु कृतकृत्यस्य मदनः।

अथवा।

समानप्रेमाणं जनमसुलभं प्रार्थितवतो,
विधौ वामारम्भे मम समुचितैषा परिणतिः,
तथाप्यस्मिन्दानश्रवणसमयेऽस्राः प्रविगल
त्प्रभां प्रातश्चन्द्रद्युतिवदनमम्लर्दयति मां।

कामः॥ सवणं॥ एवमतिदुर्ल्लभायमानः पीडयति मां वत्सो माधवो, वत्सा मालती च दुष्करं विरागा प्राणिति॥ प्रकाशं॥ पृच्छामि तावदायुष्मन्तं, अयि भवानमंस्त यथा भूरिवसुरेव मालतीमस्मभ्यं दास्यति।

माध॥ सलज्जं॥ नहि, नहि।

कामं। न तर्हि प्रागवस्थायाः परिहीयसे?

मक। भगवति, दत्तपूर्व्मेत्याश्रुते।

---

(१) यदि दैवमनुकूलं भविष्यतीति।

Digitized by Google

कामं। जानासि तां खलु वार्त्तां, दृढन्तु प्रसिद्धमेव; यथा नन्दनाय मालतीप्रार्थ्यमानं भूरिवसुर्नृपतिमुक्तवान्, प्रभवति निजकन्यकाजनस्य महाराजदृति।

मक। अस्त्येतत्।

कामं। अत्रैव स्वयं राज्ञैव दत्ता मालतीति पुरुषैरावेदितं; तदस्य, दृढि प्रतिष्ठानिबन्धनानि देहिनां व्यवहारतन्त्राणि वाचि पुण्यापुण्यहेतवोव्यवस्थिताः, सर्व्वञ्च वचनामायत्तं, सा च भूरिवसोर्व्यागनृतात्मिकैव, न खलु महाराजस्य मालती निजा कन्यका, कन्याप्रदाने च नृपतयः प्रमाणमिति नैवंविधो धर्म्माचारसमयः, तस्मादिमर्थितव्यमेतत्; कथञ्च, वत्स, माम नवधानां मन्यसे।

पक्ष ॥

मा वा सपत्नञ्चपि, नाम तद्भूत्यापं यदस्यां त्वयि वा विप्रलब्धं;
तत्सर्व्वथा सङ्गमनाय यत्नः प्राणव्ययेनापि मया विधेयः।

मक। सुष्ठु पूज्यमानमादिश्यते युष्माभिः।

अपिच ॥

दया वा स्नेहो वा, भगवति, निजेऽस्मिन् शिशुजने,
भवत्याः संसारादिरतमपि चित्तं द्रवयति।
अतस्य प्रव्रज्यासमयसुलभाचारविमुखः
प्रसक्तस्नेहो यत्नः प्रभवति पुनर्देवमपरं।

Digitized by Google

नेपथ्ये। भअवदि कामंदइ, एसा भट्टिणी विण्णवेदि; जधा मालदीं घेउण दुरिदमाअच्छदुत्ति (१)।

कामं। वत्से उत्तिष्ठ॥ वर्त्से उत्तिष्ठन्ति॥

॥ मालतीमाधवौ सकरुणानुरागमन्योन्यमवलोकयतः॥

माध॥ स्वगतं॥ कष्टमेतावती लोकयात्रा मालत्या समं माधवस्य; अहो नु खलु भोः।

सुहृदिव प्रकटोऽप्यसुखप्रदः प्रथममेकरसामनुकूलतां;
पुनरकाण्डविवर्त्तनदारुणो विधिरहो विनिहन्ति मनोरुजं।

माल॥ स्वगतं॥ महाभाअ, लोअणाणन्द, एत्तिअं दिट्ठोसि (२)।

सवं। हद्धी हद्धी सरीरसंसअं जेव्व णो पिअसही आरो विदा अमच्चेण (३)।

---

(१) भगवति कामन्दकि, एषा भर्तृदारिका विज्ञापयति; यथा मालतीं गृहीत्वा त्वरितमागच्छेति।

(२) महाभाग, लोचनानन्द, एतावदेव दृष्टोऽसि।

(३) हा धिक्, हा धिक्, शरीरसंशयमेव नः प्रियसखीं पितामात्येन।

Digitized by Google

माल। परिणदं दाणीं जीविदतिण्हाए फलं॥ साहं॥ णिव्वूढं अ णिक्करुणदाए तादस्सवि कावालिअत्तणं पदिट्ठिदो, दुट्ठदैवस्स दारुणसमारंभसरिसो परिणामो; कं एत्थ उवालभामि मन्दभाइणी, कं वा अणरणए सरणं पडिवज्जामि (१)।

जवं। सहि हदोहदो॥ इति निःक्रामति॥

माध॥ सगतं॥ नूनमाश्वासनमात्रमेवैतत् माधवस्य सह सखीहकातरा करोति भगवती॥ सोद्वेगं॥ हन्त सर्व्वथा संग्रथितजन्मसाफल्यः संवृत्तोऽस्मि, तत्किमिदानीं कर्त्तव्यं॥ विचिन्त्य॥ न खलु महामांसविक्रयादन्यदुपायान्तरं पश्यामि॥ प्रकाशं॥ वयस्य, मकरन्द, अयि भवानुत्कण्ठते मदयन्तिकायाः?

मक। अथ किं।

---

(१) परिणतमिदानीं मे जीविततृष्णायाः फलं। निर्व्यूढञ्च निष्करुणतया कापालिकत्वं तातस्यापि प्रतिष्ठितो, दुष्टदैवस्य दारुणसमारम्भसदृशः परिणामः; कमिहोपालभे मन्दभागिनी, कं वा अशरणा शरणं प्रतिपद्ये।

Digitized by Google

तन्मे मनः क्षिपति, यत्सरसप्रहार
मालोक्य मामगणितस्खलदुत्तरीया,
चक्षैकहायनकुरङ्गविलोलदृष्टि
राश्लिष्टवत्यमृतमम्बलितैरिवाङ्गैः।

माध। सुखमेव बुद्धरक्षिता प्रियसखी भवतः। अपिच।

प्रमथ्य क्व्यादं मरणसमये रक्षितवतः
परिष्वङ्गं लब्धा तव; कथमिवान्यत्र रमतां।
तथा च व्यापारः कमलनयनायानयनये
त्वयि व्यक्तस्नेहस्त्रिमितरमणीयस्थिरमभूत्।

मक। तदुत्तिष्ठा पारे; सिन्धुसम्भेदमवगाह्य, नमरीमेव प्रविशावः॥ उत्थाय परिक्रामतः॥

माध। अयमसौ महानद्योः सम्भेदः; यत्रैषः;

जलनिविशितवस्त्रव्यक्तनिर्मोकताभिः,
परिमततटभूमिः स्नानमाचोत्थिताभिः,
रुचिरकनककुम्भश्रीमदाभोगतुङ्ग
स्तनविनिहितहस्तस्खलिकाभिर्वधूभिः।

॥ इति निष्क्रान्ताः सर्व्वे॥

चतुर्थोऽङ्कः समाप्तः॥

Digitized by Google

॥ अथ पञ्चमोऽङ्कः ॥

॥ ततः प्रविश्याकाशयानेन भीषणोज्ज्वला कपालकुण्डला॥

कपालकुण्डला।

षडधिकदशनाडीचक्रमध्यस्थितात्मा,
हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः,
अविचलितमनोभिः साधकैर्ज्ञेयमाद्यः,
स जयति परिणद्धः शक्तिभिः शक्तिनाथः।

दृयमहमिदानीं।

नित्यं न्यस्तषडूर्मिचक्रनिहितं हृत्पद्ममध्योदितं,
पश्यन्ती शिवरूपिणं लयवशादात्मानमभ्यागता;
नाडीनामुदयक्रमेण जगतः पञ्चाम्बुताकर्षणा
दप्राप्तोत्पतनश्रमा विघटयन्व्यग्रे नभोऽभोमुचः।

अपिच॥

उल्लोलस्खलितकपालकण्ठमाला,
संघट्टक्वणितकरालकिङ्किणीकः;
पर्य्याप्तं मयि रमणीयडामरत्वं,
सन्धत्ते गगनतलप्रयाणवेगः।

तथाहि।

विस्रंस्यन्त्रिर्जटानां प्रचलति निविडग्रन्थिबद्धोऽपि भारः,
संस्कारक्वाणदीर्घं पटुरटति लतावृत्तिखट्वाङ्गघण्टा,
ऊर्ध्वं धूनोति वायुर्विवृतनवशिरःश्रेणिकुञ्जेषु गुञ्ज
न्मुक्ताक्षः किङ्किणीनामनवरतरणत्कारहेतुः पताका।

Digitized by Google

॥ परिक्रम्यावलोक्य च गन्धमाघ्राय ॥ इदं तावत्पुराणनिम्बतैलाक्तपरिस्पृश्यमानरसोनगन्धिभिश्चिताधूमैः, पुरस्तादिभाविनस्य महतः श्मशानवाटस्य नेदीयःकरालायतनं; यच्च, पर्य्यवसितमन्त्रसाधनस्यास्मद्गुरोरघोरघण्टस्याश्रया, सविशेषमत्रपूजासम्भारो मया यत्निधापनीयः; कथितश्च मे गुरुणा, वत्से, कपालकुण्डले, अत्र भगवत्याः करालायाः प्रागुपयाचितं क्षीरान्नमुपहर्त्तव्यं। तदेव नगरे विदितमास्ते, इति तदिचिनोमि ॥ सकौतुकमवलोक्य ॥ तत्कोऽयमतिगम्भीरमधुराकृतिः उत्तम्भितकुटिलकुन्तलः, कृपाणपाणिः, श्मशानवाटमवतरति? य एषः।

कुवलयदलश्यामोऽप्यङ्गं दधत्यरिधूसरं,
खचितचरलन्यासः श्रीमान्मृगाङ्कनिभाननः,
हरति विनयं वामोयस्य प्रकाशितसाहसः,
प्रविगलदसृक्पङ्कः पार्श्वस्खलन्नरजङ्घलः?

॥ निरूप्य ॥ अये; सएष कामन्दकीसुहृत्पुत्रो महामांसस्य पण्डितो!

माध; नेपथ्ये ॥ तत्किमनेन भवतु; समीहितं सम्पादयामि। विगलितप्रायस्य पश्चिमसन्ध्यासमयः।

तथाहि सम्प्रति,

व्योमस्थापिकगुहावलिभिरिव तमोवल्लरीभिर्व्रियन्ते
पर्य्यन्ताः, प्रान्तवृत्त्या पयसि वसुमती नूतने मज्जतीव;
वात्यासम्वेगविभ्रमितततरुथितस्फीतधूम्याप्रकाण्डं,
प्रारब्धेऽपि चितामा तरुणयति निजं गौरिमाणं वनेषु।

Digitized by Google

॥ परिक्रम्य निष्क्रान्तः ॥ विष्कम्भकः ॥

॥ ततः प्रविशति यथानिर्दिष्टो माधवः ॥

माध ॥ साशंसं ॥

प्रेमार्द्राः प्रणयस्मृतः परिचयादुद्गाढरागोदया
स्तासामुग्धदृशो निसर्गमधुरास्चेष्टाभवेयुर्मयि ;
यास्वन्तःकरणस्य वाह्यकरणव्यापाररोधी क्षणा
दाशंसा परिकल्पितास्वपि भवत्यानन्दसाम्रोदयः ।

किञ्च ।

अतिमुक्तसङ्घटितकेसरावलीसततासवसुभगार्पितस्तनं,
अपि कर्णजाहविनिवेशितानना प्रियया तदङ्गपरिवृत्तमाप्नुयां।

अथवा । दूरे तावदेतत् हृदमेव प्रार्थये ।

सम्भूयेव सुखानि चेतसि परं भूमानमातन्वते,
यच्चालोकपथावतारिणि रतिं प्रस्तौति नेत्रोत्सवः;
यद्वाखेन्दुकलोक्षयादवचितैः सारैरिवोत्पादितं,
तत्पश्येयमनङ्गमङ्गलगृहं भूयोऽपि तस्यामुखं ।

यत्सत्यमधुना तत्सन्दर्शनेनातिस्वल्पोऽपि न विशेषः । मम हि संप्रति सातिशयप्राक्तनोपलम्भसम्भावितात्मजन्मनः संस्कारस्यानवरतप्रबोधात्प्रतीयमानस्तद्विषदृशप्रत्ययान्तरैरतिरस्कृतप्रवाहः, प्रियतमास्मृतिप्रत्ययोत्पत्तिसन्तानस्तन्मयमिव करोत्यन्तर्वृत्तिसारूप्यतस्तैतन्यं । तथाहि ।

Digitized by Google

लोनेव प्रतिविम्बितेव, लिखितेवोत्कीर्णरूपेव च,
प्रत्युप्तेव च, वज्रलेपघटितेवान्तर्निखातेव च,
या नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभि
श्चिन्तासन्ततितन्तुजालनिबिडस्यूतेव लग्ना प्रिया।

॥ नेपथ्ये कलकलः ॥

माध। अहो, सम्प्रति प्रगल्भमानकौणपनिकायस्य महती श्मशानवाटस्य रौद्रता।

अस्मिन् हि।

पर्य्यन्तप्रतिरोधिमेदुरचयस्यानं चिताज्योतिषा
भीज्ज्वल्यं परभागतः प्रकटयत्याभोगभीमं तमः;
संसक्ताकुलकेलयः किलकिलाकोलाहलैः सम्मदा
दुत्तालाः कटपूतनाप्रभृतयः संराविणं कुर्वते।

भवत्वाघोषयामि तावत्। भोः श्मशाननिकेतनाः प्रकट पूतनाः।

अश्वस्थपूतमव्याजं पुरुषाङ्गोपकल्पितं,
विक्रीयते महामांसं; गृह्यतां, गृह्यतामिदं।

॥ पुनर्नेपथ्ये कलकलः ॥

माध। कथमाघोषणानन्तरमेव सर्वतः समुच्चलदुत्ताल वेतालमुक्तमुखाव्यक्तकलकलाकुलः प्रचलितद्वाविर्भावाद्भूत सङ्कटः श्मशानवाटः आश्चर्य्यं।

Digitized by Google

कर्णाभ्यर्णविदीर्णसक्थविकटव्यादानदीप्ताग्निभि
र्दंष्ट्राकोटिविघट्टटैरितदृतोधावद्भिराकीर्यते,
विद्युत्पुञ्जनिकाशकेशनयनभ्रूश्मश्रुजालैर्नभो
लङ्घालङ्घविशुष्कदीर्घवपुषामुल्कामुखानां मुखैः।

अपिच।

एतत्पूतनचक्रमक्रमलतग्रामायमुल्कैर्वृका
मुत्पुष्णन्परितोनृमांसविघसैराघर्घरं क्रन्दतः;
खर्जूरद्रुमदन्नजङ्घमसितलङ्घद्विडम्बक्रत
स्नायुग्रन्थिघनास्थिपञ्जरजरत्कङ्कालमालोक्यते।

॥ समन्तादवलोक्य विहस्य च ॥ अहो प्रकारः पिशाचानां।

एते हि।

ततपृथुरसनोग्रमांसमर्च्चं दधति विदार्य्य विवर्णदीर्घदेहाः,
खलदजगरघोरकोटराणां द्युतिमिव दग्धपुराणरोहिणानां,

॥ परिक्रम्य ॥ हन्त, बीभत्समेवाग्रे वर्त्तते।

उत्कृत्योत्कृत्य क्षत्तिं प्रथममथ पृथूल्लोकभूर्याणि मांसा
न्यंसस्थिक्पृष्ठपिण्डाद्यवयवसुखभान्युग्रपूतीनि जग्ध्वा,
आर्त्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्गः करङ्गा
दङ्कस्थादस्थिसंस्थं स्वपुटगतमपि क्रव्यमव्यग्रमत्ति।

अपिच।

Digitized by Google

निष्ठापक्षिवदस्थ्नः क्वथनपरिणमन्मेदसः प्रेतकायान्
दृष्ट्वा संक्रधूमानपि कुणपभुजो भूयसीभ्यस्त्रिताभ्यः,
उत्पक्वस्कंधि मांसं प्रचलदुभयतः सन्धिनिर्मुक्तमारा
देते निष्कृष्य, जंघानलकमुदधिनीर्मज्जधाराः पिबन्ति ।

॥ विहस्य ॥ अहो प्रादोषिकः प्रमोदः पिशाचाङ्गनानां । तथाहि ।

अन्त्रैः कल्पितमङ्गलप्रतिसरा स्त्रीहस्तरक्षोत्पल
व्यक्तोत्तंसभृतः पिनद्धशिरसा हृत्पुण्डरीकस्रजः,
एताः शोणितपङ्कुकुङ्कमजुषः सभूय कान्तैः, पिब
न्त्यस्थिस्नेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः ।

॥ परिक्रम्य पुनरग्रतो इति पठित्वा ॥ कथं द्रागतिप्रशान्तभीषणभीषिकाप्रकारैर्भेटित्यपक्रान्तपिशाचैः । अहो, निःसत्त्वता पिशाचानां ॥ परिक्रम्य दृष्ट्वा सनिर्वेदं ॥ विचित्रश्चैष समन्तात् श्मशानवाटः ।

तथाहि ॥ खल्वियं पुरतएव ।

गुञ्जत्कुञ्जकुटीरकौशिकघटाच्छूत्कारसंवलित
क्रन्दत्फेरवचण्डडाकृतिभृतप्राग्भारभीमैस्तटैः,
श्रान्तःशीर्णकरङ्ककर्करपथः संरोधकूलङ्कष
स्रोतोनिर्गमघोरघर्घररवा पारेश्मशानं सरित् ।

Digitized by Google

॥ नेपथ्ये ॥ हा तात निष्करुणो; एषो दाणिं ते नरेन्द्रचित्ता राहणोवश्करणो जणोविवज्जइ (१)।

माध ॥ साकूतमाकर्ण्य ॥

नादस्तावदिकलकुररीकूजितस्निग्धतार
श्चित्ताकर्षी परिचितइव श्रोत्रसंवादमेति।
अन्तर्भिन्नं भ्रमति हृदयं, विक्लवत्यङ्गमंगं,
देहस्तम्भः, स्खलति च गतिः; कः प्रकारः, किमेतत्?
करालायतनाद्यायमुच्चरत्करुणध्वनिः;
विभाव्यते ननु स्वानमनिष्टानां तदीदृशं।
भवतु, पश्यामि ॥ इति प्रति परिक्रामति ॥

॥ ततः प्रविशतो देवतार्चनव्यग्रहस्तौ कपालकुण्डलाघोर घण्टौ क्षतबध्यचिह्ना मालती च ॥

माल। हा तात निक्करुणो; एसो दाणिं ते णरेन्दचित्ताराहणोवश्करणो जणो विवज्जई। हा अम्म, णिणेहमश्हिश्ए, तुमं वि हदाशि देव्वदुव्विलसिदेण। हा मालदीमश्जीविदे, मम कल्लाणसाहणेक्कसुहसश्लवावारे भश्वदि

---

(१) हा तात निष्करुण; एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनोविपद्यते।

Digitized by Google

चिरस्स आणाविदासि दुःखं विणेहेण; हा पिअसहि लवंगिए, णिव्विणआवसरमेत्तदंसणा अहं दे संवुत्ता (१)।

माध। हन्त, वैक्लव्यं मदिरेक्षणा; संप्रति निरस्तएव संदेहः; तदहमपि नामैनां जीवन्तीं सम्भावये॥ त्वरितं परिक्रामति॥

अघोरघण्टकपालकुण्डले। देवि चामुण्डे, नमस्ते नमस्ते।

सावष्टम्भनिगुम्भनिर्भरनमद्भूगोलनिष्पीडन
न्यञ्चत्कूर्परकूर्मकम्पविगलद्ब्रह्माण्डखण्डस्थिति
पातालप्रतिमल्लगह्वरविवरप्रक्षिप्तसप्तार्णवं,
वन्दे, नन्दितनीलकण्ठपरिवद्बालार्द्धं, वः क्रोडितं।

अपिच॥

प्रचलितकरिहस्तिपर्य्यन्तचञ्चत्फणाघातभिन्नेन्दुनिस्यन्द मानामृतस्रोतश्चीवत्कपालावलीमुक्तचण्डाट्टहासच्छटाभूरिभूत प्रवृत्तस्तुति, स्फुरदसितभुजङ्गभोगाङ्गदग्रन्थिनिष्पीडनस्फारफु ल्लफणावलीपीठनिर्य्यद्विषज्योतिरुज्जृम्भणोद्दामरश्मिविस्फारि दोःखण्डपर्य्यासितच्छाधरं, ज्वलदनलशिखाङ्कनेत्रकटाक्षभीमो

(१) हा तात निष्करुण, एष इदानीं ते नरेन्द्रचित्ताराधनोपकरणं जनोविपद्यते; हा मातः, स्नेहमयहृदये त्वमपि हतासि दैवदुर्व्विलसितेन; हा मालतीमयजीविते मम कल्याण साधनैकप्रभवकलव्यापारे, भगवति, चिरस्य स्थापितासि दुःखं स्नेहेन; हा प्रियसखि लवङ्गिके, स्वल्पावसरमात्रदर्शना अहन्ते संवृत्ता।

Digitized by Google

क्षमाङ्गभ्रमिप्रस्तनालातचक्रक्रियाभूतदिग्भाममुक्तुङ्गखट्वाङ्ग
कोटिघट्टध्वजोद्भूतविच्छिन्नतारागणं, प्रमुदितकटपूतनोत्ताल
वेतालतालस्फुटत्कर्णसम्भाव्यगौरीघनाश्लेषहृद्यश्मशानं
दि, वस्तावदेवि, भूयादभीष्टैव वः सिद्धये च नः॥ इत्यभिनयतः॥

माध। हा धिक् प्रमादः!

न्यस्तालक्तकरक्तमाल्यवसना, पार्श्वस्थशार्ङ्गालयोः
पापारम्भकयोर्गलीव वृकयोर्भीर्दुर्गता गोचरं,
सेयभूरिवसोर्वसोरिव सुता, मृत्योर्मुखे वर्त्तते;
हा धिक्कष्टमनिष्टमस्तकरणः कोऽयं विधेः प्रक्रमः।

कपाल। लं भद्दे सार, दयितोऽयस्तवाभू
देव; लां त्वरयति दारुणः कृतान्तः।

माल। हा दइअ नाह माहव, परलोअगदोवि सुमरिदव्वो तुह्मेहिं अअं जणो; ण उ सो उवरदो, जस्स वल्लहो जणो सुमरेदि (१)।

कपाल। हन्त, माधवानुरक्तेयं वराकी तपस्विनी।

अघोर॥ भक्तिमुद्यम्य॥ यदस्तु तदस्तु; व्यापादयामि।

चामुण्डे, भगवति, मन्त्रसाधनादा
वद्दिष्टा पनिहितां भजस्व पजां।

॥ इति हन्तुमुपक्रान्तः॥

---

(१) हा दयित नाथ माधव परलोकगतोऽपि स्मर्त्तव्योऽयं जनोयुष्माभिः; न खलु स उपरतो यस्य वल्लभः स्मरति।

Digitized by Google

माध ॥ सहसोपसृत्य प्रकोष्ठे मालतीं निक्षिप्य ॥ दुरात्मन्नेष प्रतिहतोऽसि ; अपसर्प, नन्वयं न भवसि ?

माल ॥ सहसावलोक्य ॥ परित्रायतां मां महानुभावो माधवो ॥ इति माधवमालिङ्गति ॥ (२)।

माध। महाभागे, न भेतव्यं।

मरणसमये त्यक्त्वा शंकां प्रतापनिरर्गल
प्रकटितनिजस्नेहः, सोऽयं सखा पुरएव ते
सुतनु, विसृजोत्कम्पं, संप्रत्यसाविह पाप्मनः
फलमनुभवत्युग्रं पापप्रतीपविपाकिनः।

अघो। आः कएष पापोऽस्माकमन्तरायः समृत्तः।

कथाभगवत्याएवायमस्याः स्नेहभूमिः कामन्दकीसुहृत्पुत्रो, महामांसस्य पण्डिता, माधवोनाम।

माध ॥ साधु ॥ महाभागे, किमेतत् ?

माल ॥ चिरादाश्वस्य ॥ महाभाग, अहं ण किंपि जाणामि; एत्तिअं उण जाणामि, उवरिअलिन्दे पसुत्ता, दुह पडिबुद्धम्हि; तुम्हे उण कहिं (१) ?

माध ॥ सलज्जं ॥

---

(१) परित्रायतां मां महानुभावः।

(२) महाभाग अहं किमपि न जानामि; एतावदेव पुन जानामि, उपर्य्यलिन्दके प्रसुप्ता दुह विबुद्धास्मि; यूयं पुनः क्वच ?

Digitized by Google

त्वत्पादपङ्कजपरिग्रहपुण्यजन्मा
भूयासमित्यभिनिवेशकदर्थ्यमानः,
भ्राम्यन्नृमांसपचनाय, परेतभूमा
वाकर्ष, भीरु, रुदितानि तवागतोऽस्मि।

माध॥ खगतं॥ हद्धी हद्धी, कधं मम कारणादो एव्वं एदे अप्पणिरपेक्खा परिक्कामन्ति (१)।

माध। अहो नु खलु भोः सदेतत्काकतालीयं नाम। संप्रति हि,

राहोस्यन्दकलामिवाननचरीं दैवात्समासाद्य, मे,
दृष्टोरक्षुपापपातविषयादाक्षिप्यतः प्रेयसीं,
आतङ्कादिकलं, द्रुतं करुणया, विक्षोभितं विस्मयात्,
क्रोधेन ज्वलितं, मुदा विकसितं, चेतः कथं वर्तताम्।

अघो। रे रे ब्राह्मणडिम्भ।

व्याघ्राघ्रातमृगीकृपाकुलमृगन्यायेन, हिंसारुचेः,
पापप्राणुपहारकेतनजुषः, प्राप्तोऽसि मे गोचरं।
सोऽहं प्राभवतैव भूतजननीमृप्तोमि, खड्गाहति
छिन्नस्कन्धकबन्धरन्ध्ररुधिरप्राग्भारनिष्यन्दिना।

माध। दुरात्मन्, पाषण्ड, चाण्डाल।

---

(१) हा धिक् हा धिक्, कथं मम कारणादेवमेते आत्म निरपेक्षाः परिक्रामन्ति।

Digitized by Google

असारं संसारं, परिमुषितरत्नं त्रिभुवनं,
निरालोकं लोकं, मरणशरणं बान्धवजनं,
अदर्पं कन्दर्पं, जनयननिर्माणफलं,
जगज्जीर्णारण्यं कलयति विधातुं व्यवसितः।

अपिच। रे रे पाप।

प्रणयिसखीसलीलपरिहासरसाधिगते
र्लक्षितशिरीषपुष्पहननैरपि ताम्यति यत्,
वपुषि वधाय तच्च तव शस्त्रमुपक्षिपतः,
पततु शिरस्काण्डयमदण्डदुर्वैष भुजः।

अघोर। आं दुरात्मन् प्रहर, नत्वयं न भवसि।

माल। पसीद णाह साहसिअ; णाम दारुणो क्खु अअं हदासो; पडिणिअत्तीअदु इमादो अणत्थसंभादो (१)।

कपा। भगवन्नप्रमत्तो भूत्वा, दुरात्मानं व्यापादय।

माधवाघोरघण्टौ मालतीकपालकुण्डले प्रति। अयि भीरु,

धैर्यं निधेहि हृदये, हतएषपापः;
किं वा कदाचिदपि केनचिदन्यभावि;
सारङ्गसङ्गरविधाविभकुम्भकूट
कुट्टाकपाणिकुलिशस्य हरेः प्रमादः।

---

(१) प्रसीद नाथ साहसिक; नाम दारुणः खल्वयं हताशः; तन्प्रतिनिवर्त्यतामस्मादनर्थसंभ्रमात्।

Digitized by Google

॥ नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ॥

॥ पुनर्नेपथ्ये । भोभो मालत्यन्वेषिणः सैनिका इयममात्यभूरिवसुमाश्वासयन्त्यप्रतिहतप्रतिज्ञा भगवतो कामन्दकी वः समादिशति ।

पर्य्यवस्थतामेतत्कराला यतनं द्रुतं,
माघोरघण्टाहन्यस्य कर्मैतद्भीषणाद्भुतं;
न करालोपहाराच्च फलमन्यद्विभाव्यते;

कपा । भगवन्, पर्य्यवस्थाः स्मः ।

अघोर । संप्रति विशेषतः घोरघण्टावशरः ।

माल । हा तात, हा भगवति ।

माध । भवतु; बान्धवसमाजसुखितां मालतीं विधाय, तत्समक्षमेनं दुरात्मानं व्यापादयामि ॥ मालतीमन्यतः कापालिकश्चान्यतः प्रेरयन्परिक्रामति ॥

माधवाघोरघण्टौ ॥ अन्योन्यमुद्दिश्य ॥ आः पाप !

कठोराक्षिप्तन्विव्यतिकररणत्कारमुखरः,
खरक्षायुक्षेदक्षणविहितवेगव्युपशमः,
निरातङ्कः पङ्केष्विव पिशितपिण्डेषु विलस
न्विर्गाचं गाचं सपदि खवशस्ते विकिरतु ।

॥ इति निष्क्रान्ताः सर्वे ॥

मालतीमाधवे पञ्चमोऽङ्कः ॥

Digitized by Google

॥ अथ षष्ठोऽङ्कः ॥

॥ ततः प्रविशति कपालकुण्डला ॥

कपा। आः दुरात्मन्मालतीनिमित्तं व्यापादितास्मद्गुरो माधवस्तवक, अहं त्वया तस्मिन्नवसरे निर्दयं निष्पत्यवज्ञाता ॥ सक्रोधं ॥ तदवश्यमनुभविष्यसि कपालकुण्डलाकोपस्य विजृम्भितं।

भ्रान्तिः कुतस्तस्य भुजङ्गयोर्यस्मिन्नमुष्मानुगया सदैव,
जागर्त्ति दंशाय निशातदंष्ट्राकोटिर्विषोद्गारगुरुर्भुजङ्गी।

॥ नेपथ्ये॥ भो राजानस्वरमवधसामाज्ञया सञ्चरध्वं,

कर्त्तव्येषु श्रवणसुभगं भूमिदेवाः पठन्तु;
चित्रं नानावचननिवहैश्चेष्टतां मङ्गलेभ्यः
प्रत्यासन्नस्खलयतितराञ्जन्ययाचाप्रवेशः।

यावत्सम्बन्धिनो न परापतन्ति, तावदत्यया मालत्या सह नगरदेवतागृहमविघ्नमङ्गलाय गन्तव्यमित्यादिशन्ति भगवते निदेशवर्त्तिनो ऽमात्यदाराः; तथा गृहीतसविशेषमण्डनः प्रतीक्ष्यतामानुयात्रिको जनः।

Digitized by Google

कपा। भवतितोमालतीविवाहसत्वरप्रतीहारप्रतर्षकुला दस्मात्प्रदेशादपक्रम्य, माधवापकारं प्रत्यभिनिविष्टा भवा नीति ॥ निष्क्रान्ता; विष्कम्भकः ॥

॥ ततः प्रविशति कलहंसकः ॥

आणत्तोम्हि, णअरदेवदागब्भघरत्थिदेण णाहमाहवेण स मअरन्देण, जहा, आणीहि दाव अत्तामुहं पउत्ता मालदी, ण वेति; ता आव णं आणन्दइस्सं (१)।

॥ ततः प्रविशतोमाधवमकरन्दौ ॥

माध। मालत्याः प्रथमावलोकनदिनादारभ्य, विस्तारितै

भूयः स्नेहविचेष्टितैर्मृगदृशोनीतस्य कोटिं परां;

अद्यान्तः खलु सर्व्वथास्य मदनायासप्रबन्धस्य मे,

कल्याणं विदधातु वा भगवती, नीतिर्विपर्य्येतु वा।

मक। वयस्य, कथं हि भगवत्याः सुमेधसो नीतिर्विपर्य्येष्यति।

कल ॥ उपसृत्य ॥ णाह माहव, दिट्ठिआ वड्ढसि, पउत्ता क्खु अत्तामुहं मालदित्ति (२)।

---

(१) आज्ञप्तोऽस्मि, नगरदेवतागर्भगृहस्थितेन समकरन्देन नाथमाधवेन, यथा, जानीहि यावन्मुखं प्रवृत्ता मालती न वेति; तद्यावदेनमानन्दयिष्यामि।

(२) नाथ माधव, दिष्ट्या वर्द्धसे, प्रवृत्ता खलु यावन्मुखं मालतीति।

Digitized by Google

माध। अपि नाम सत्यं?

मक। किमश्रद्धानइव पृच्छसि; नकेवलं प्रवृत्ता, प्रत्यासन्ना च वर्त्तते। तथाहि।

अस्माकमेकपदमेव मरुद्विकीर्णं
जीमूतजालरचितानुकृतिर्निनादः;
गम्भीरमङ्गलमृदङ्गसहस्रजन्मा
ब्रह्माण्डरन्ध्रगणनक्षमिमं करोति।

तदेहि जालमार्गेण पश्यामः॥ तथा कुर्व्वन्ति॥

कल। णाह, पेक्खस्सु; पेक्खस्सु एदे दाव उप्पडिअराअ हंसविब्भमाभिरामचामरसमीरणोव्वेल्लकदलि आवलिअरङ्गि दुत्तानगअणंगणसरोवरणिरन्तरुद्दण्डपुण्डरीअविब्भमं वह न्तो, धवलादवत्तणिवहा दीसन्ति(१)।

एदाअ सविलासकवलिदतंबोलवीटिआपूरिदकवोलमण्डला भोअव्वदिअरक्खलिदमहुरमङ्गलगीदबद्धकोलाहलेहिं विविह

---

(१) नाथ, पश्य; पश्य एते तावदुत्पतितराजहंसविभ्रमा भिरामचामरसमीरणोद्वेल्लत्कदलिकावलीतरङ्गितोत्तानग गणाङ्गनसरोवरनिरन्तरोद्दण्डपुण्डरीकविभ्रमं वहन्तो, धवला तपत्रनिवहा दृश्यन्ते।

(२) एताश्च सविलासकवलितताम्बूलवीटिकापूरितकपोलमण्ड लाभोग्यदयितकरस्खलितमधुरमङ्गलगीतबद्धकोलाहलैः विविध

Digitized by Google

रत्नालङ्कारकिरणावलीविजृम्भितमहेन्द्रचापविच्छेदविच्छुरितनभःस्थलैर्व्वारसुन्दरीकदम्बैरध्यासिताः क्वणत्कनककिङ्किणीजालझणझणशब्दकारिण्यः करिण्यः (१)।

॥ माधवमकरन्दौ मकौतुकं पश्यतः ॥

मक। रमणीयाः खल्वमात्यभूरिवसोर्विभूतयः। तथाहि।

प्रेङ्खद्भेरिमयूखमेचकचयैरुन्मेषिवासच्छद
च्छायासम्बलितैर्विवर्त्तिभिरिव प्राग्लेषु पर्य्यागताः,
व्यक्ताखण्डलकार्मुकादव भवन्त्यचिरचीनांशुक
प्रस्तारस्थगिताद्वोन्मुखमणिज्योतिर्म्मितानैर्दिशः।

कल। कधं, सयम्भमाणेक्कपडिहारमण्डलावज्जिदुज्जलकणअकलहौअपङ्कविचित्तवेत्तलदापरिक्खित्तरेहारइदमण्डलोदूरदोज्जेव्व परिअणो संच्छिदो एसा अ वहलसिंदूरणिअरसंझाराओवरत्तचडुलमुहघोलन्तकल्लणक्खत्तमालाभरणधारि

रत्नालङ्कारकिरणावलीविजृम्भितमहेन्द्रचापविच्छेदविच्छुरितनभःस्थलैर्व्वारसुन्दरीकदम्बैरध्यासिताः क्वणत्कनककिङ्किणीजालझनझनशब्दकारिण्यः करिण्यः।

(१) कथं सयम्भ्रमानेकप्रतिहारमण्डलावर्जितोज्ज्वलकनककलधौतपङ्कविचित्रवेत्रलतापरिक्षिप्तरेखारचितमण्डलोदूरतएव संक्षिप्तोऽस्याः परिजनः। एषा च वहलसिन्दूरनिकरसन्ध्यारागोपरक्तचटुलमुखघूर्णत्काल्लनक्षत्रमाला

Digitized by Google

धीं करेणुरञ्जनीमलङ्कुर्व्वन्ती, इदएव कौतूहलोन्मुखसमस्तलोकहृश्यमाननयनोहरा, पाण्डुरपरिक्षामदेहशोभा, प्रथमचन्द्रलेखाविभ्रमं वहन्ती, किंचिदन्तरे प्रसरिदा मालती (१)।

मक। वयस्य, पश्य पश्य।

दृयमवयवैः पाण्डुश्यामैरलंकृतमण्डना
कलितकुसुमा वालेवाम्रलताऽपरिशोषिणी,
वहति च वरारोहा रम्यां विवाहमहोत्सव
श्रियमुदयिनीमुद्गाढां च द्यनक्ति मनोरुजं।

कथं, निषादिता गजवधूः।

माध ॥ सानन्दं ॥ कथमवतीर्य्य भगवतीश्रवङ्किकाभ्यां समभितः प्रवृत्तेव।

ततः प्रविशति कामन्दकी मालती श्रवङ्किका च ॥

कामं ॥ सहर्षमपवार्य्य ॥

विधाता भद्रं नो वितरतु मनोज्ञाय विधये,
विधेयासुर्देवाः परमरमणीयां परिणतिं;
कृतार्थीभूयासं प्रियसुहृदपत्योपयमने,
प्रयत्नः कृत्स्नोऽयं फलतु, शिवदायी च भवतु।

भरणधारिणीं करेणुरजनीमलंकुर्व्वती, इतएव कौतूहलोन्मुखसमस्तलोकहृश्यमाननयनोहरा, पाण्डुरपरिक्षामदेहशोभा, प्रथमचन्द्रलेखाविभ्रमं वहन्ती, किंचिदन्तरे प्रसृता मालती।

Digitized by Google

माल॥ खगतं॥ केण उण उवाएण सम्पदं मरणणिव्वा णस्सअन्तरं सम्भावइस्सं? मरणं वि मन्दभाअहेआणं अहिमदं त्ति सुदुल्लहं होदि (१)।

लवं ॥ खगतं॥ अतिक्कन्तामिदा खु पिअसही एदिणा अणुकूलविप्पलम्भेण (२)।

॥ प्रविश्य॥ पेटकहस्ता प्रतीहारी। अमच्चो भअवदीं विण्ण वेदि; एदिणा णलिन्दाणुप्पेसिदेण विवाहणेवत्थेण देवदापुरदो अलंकरिदव्वा मालदीत्ति (३)।

कामं। युक्तमाहामात्यः, मांगलिकमेतत् स्थानमतोदर्शय।

प्रती। इदं दाव धवलवट्टंसुअं चोलअं, एदं च उत्त रीअं रत्तवण्णंसुअं, इमे अ सव्वङ्गिआ आहरणसङ्घाआ, अअं च मोत्तिआहारो, एदं चन्दणं, कुसुमापीडं अ (४)।

---

(१) केन पुनरुपायेन साम्प्रतं मरणनिर्व्वाणस्यान्तरं सम्भा वयिष्ये? मरणमपि मन्दभागधेयानामभिमतमिति सुदुर्लभं भवति।

(२) अतिक्रान्तामिता खलु प्रियसखी एतेनानुकूलविप्रलम्भेन।

(३) अमात्यो भगवतीं विज्ञापयति; एतेन नरेन्द्रानु प्रेषितेन विवाहनेपथ्येन देवतापुरतोऽलङ्कर्त्तव्या मालतीति।

(४) इदं तावद्धवलपट्टांशुकं चोलकं, इदमौत्तरीयं रक्तांशुकं, इमे च सर्व्वाङ्गिकाआभरणसंयोगाः, अयञ्च मौक्तिकाहारः, इदं चन्दनं कुसुमापीडश्च।

Digitized by Google

कामं ॥ अपवार्य ॥ रमणीयं हि वस्तुमकरन्दमवलोकयिष्यति।

मद ॥ प्रकाशं गृहीत्वा ॥ भवत्येवमुच्यतामात्मयः ॥ प्रतिहारी तथेति निष्क्रान्ता ॥

कामं। वत्से सवत्रिके, प्रविश त्वमभ्यन्तरं वत्सया मालत्या सह।

सवं। अध भअवदी उअ कहिं (१)।

कामं। अहमपि तावदिविक्ते अलङ्करणरत्नानां प्राग्रूपं मालतः परीक्षिष्ये॥ इति निष्क्रान्ता ॥

माल ॥ सभयं॥ कधं, सवत्रिकामात्रेण परिवारिअ मन्तुत्ता (२)।

सवं। इदं देवदामंदिरदुवारं ता पविसस्सं ॥ इति प्रविशतः (३)॥

मक। वअस्स, इतस्त्वापवारितशरीरौ तिष्ठावः॥ तथा कुरुतः॥

सवं। सहि, अअं अकुराओ, इमाओ कुसुममालाओ (४)।

माल। तदो किं।

---

(१) अथ भगवती पुनः कुत्र।

(२) कथं, सवत्रिकामात्र परिवारयित्वा मन्त्रयेते।

(३) एतद्देवतामन्दिरद्वारं तत्प्रविशावः।

(४) सखि, अयमङ्कुरागः, इमाः कुसुममालाः।

Digitized by Google

सवं। सखि, इमस्मिं पाणिग्गहणमङ्गलारम्भे, कल्लाणसम्पत्तिनिमित्तं देवदाओ पूजेहित्ति, अम्बाए अणुप्पेसिदासि(५)।

माल। किं दाणिं दारुणसमारम्भदेव्वदुव्विलासपरिणामदुःखणिद्दहमाणसं पुणोपुणो वि मम्मच्छेअदुःसहं मंदभाइणीं दूमावेसि(१)।

सवं। अदु, किं वत्तुकामासि(२)?

माल। जं दाणिं दुल्लहाभिणिवेसिमणोरहविसंवदन्तभाअधेओ जणोमन्नदि(३)।

भक। सक्खे, मुतं।

माध। मुतमसम्मोसस्स हृदयस्स।

माल ॥ सवङ्गिकां परिष्वज्य ॥ ता, परमत्थवहिणि पिअसखि सवङ्गिए, एसा दाणिं दे पिअसही अणाहा, मरणे वट्टमाणा, आगअणिग्गमणिमित्तिरन्तरोपआरविरूढवीसम्भ

---

(५) सखि अस्मिन् पाणिग्रहणमङ्गलारम्भे, कल्याणसम्पत्तिनिमित्तं देवताः पूजयेति, अम्बयानुप्रेषितासि।

(१) किमिदानीं दारुणसमारम्भदैवदुर्विलासपरिणामदुःखनिर्दहमानसां पुनर्म्मर्म्मच्छेददुःसहां मन्दभागिनीं दुनोषि।

(२) अपि किं वक्तुकामासि?

(३) यदिदानीं दुर्लभाभिनिवेशिमनोरथविसम्वादभागधेयो जनो मन्यते।

(४) तत्परमार्थभगिनि प्रियसखि सवङ्गिके, एषा

Digitized by Google

परिसं परिस्सईअ तुमं, पत्थेदि, जइ दे अहं अणुवट्टणीआ, तदो मं हिअएण धारअन्ती, समग्गसोहग्गलच्छीपरिग्गहे कमङ्कलं माहवसिरिणो मुहारविन्दं आणन्दमसिणं अवलोअ इस्सदि ॥ इति रोदिति (४)॥

माध। वयस्य मकरन्द,

स्नानस्य जीवकुसुमस्य विकाशनानि,
सन्तर्पणानि सकलेन्द्रियमोहनानि,
आनन्दनानि हृदयैकरसायनानि,
दिष्ट्या मयाप्यधिगतानि वचोऽमृतानि।

माल। अहो अ तस्स जीविदप्पदाइणो जणस्स अवत्थिदत्तिमं सुणिअ सन्तव्वमाणस्स, तं तहाविहं सरीरसंणं ण परिहीअदि; जधा अ लोअन्तरपरिगदं वि मं उद्दिसिअ सो जणो संसरणकधामेत्तपरिसेसं कालन्तरेवि लोअजत्तं ण विढिखेदि तहा करेमि। एवंखेव पिअसहीए पसादादो मालदी कदत्था; भोदि (१)।

इदानीं ते प्रियसखी अनाथा, मरणे वर्त्तमाना, आगर्भनिर्गम निर्मितनिरन्तरोपकारविरूढविश्रम्भगाढं परिष्वज्य त्वां, प्रार्थयते, यदि ते अहमनुवर्त्तनीया ततोमां हृदये धारयन्ती समग्रसौभाग्यलक्ष्मीपरिग्रहकमङ्गलं माधवश्रियो मुखार विन्दमानन्दमसृणमवलोकयिष्यसि।

(१) यथा च, तस्य जीवितप्रदायिनो जनस्यावस्थितेति मां

मक। हन्त अतिकरुणं वर्त्तते।

माध। नैराश्यकातरधियो हरिणेक्षणायाः
मुक्ता निकामकरुणञ्च, मनोहरञ्च;
वात्सल्यमोहपरिदेवितमुद्वहामि,
चिन्ताविषादविपदञ्च, महोत्सवञ्च।

सवं। अद पत्तिहदं दाणिं दे अमङ्गलं ण अहोवि अधिअदरं सुणिस्सं (१)

माल। यदि प्रियं खलु युष्माकं मालतीजीवितं, ण उण मालदी (२)।

सवं। किं एव्वं भणिदं ण भोदि (३)

मुक्ता सन्त्यमानस्य, तत्तथाविधं शरीररत्नं न परिहीयते; यथा च मां परलोकगतामपुद्दिश्य स्व जनः संस्मरणकथा माचपरिशेषां कालान्तरेऽपि लोकयात्रां न विच्छिनत्ति, तथा करिष्यसि; एवमेव प्रियसखप्रसादात् मालती कृतार्था भवति।

(१) अथि प्रतिहतमिदानीं ते अमङ्गलं नातोऽधिकतरं श्रोष्यामि।

(२) यदि प्रियं खलु युष्माकं मालतीजीवितं न पुनर्मालती।

(३) किमेवं भणितं न भवति।

Digitized by Google

माल॥ आत्मानं निर्हृत्य॥ जेण अण्णजणपच्चायणिबन्धणेहिं वअणसंविहाणेहिं जीआविअ इमं च्चेव महावीभच्छारंभं अणुभाविदम्हि; संपदं उण मम मणोरहो एसो च्चेव जं तस्स देवस्स परोक्खगुणकित्तणेण अणवरद्धं अत्ताणं परिच्चइस्सं त्ति; ता, इमस्सिं पओअणे पिअसही मे अपरिपन्थिणी होदु ॥ इति पादयोः पतति (१)॥

मक। सैषा सीमा खेदस्य ॥

॥ लवङ्गिका माधवं संज्ञया समाकृषति ॥

मक। वअस्स, उपसृत्य लवङ्गिकायाः स्थाने तिष्ठ।

माध। वअस्स, परवानस्मि साध्वसेन।

मक। दृषदेव नेदीयसां प्रकृतिरभ्युदयानां।

॥ माधवः खेदं लवङ्गिकास्थाने तिष्ठति ॥

माल। सहि, करेहि अणुजाणदाए पसादं (२)।

माध। सरले साहसरागं परिहर, रम्भोरु मुञ्च संरम्भं,
विरसं विरहायासं, सोढुं तव चित्तमसहं मे।

---

(१) येनान्यजनप्रत्यायनिबन्धनैर्वचनसंविधानैर्जीवयित्वा इममेव महावीभत्सारम्भमनुभावितास्मि। साम्प्रतं पुनर्मम मनोरथ एष एव यत्तस्य देवस्य परोक्षगुणकीर्त्तनेन अनपराद्धं मात्मानं परित्यक्ष्यामीति। तदस्मिन् प्रयोजने प्रियसखी मे अपरिपन्थिनी भवतु।

(२) सखि, कुरु अनुकूलतायै प्रसादं।

Digitized by Google

माल । सखि, अलंअणीओ्व्वेअ दे मालदीअआमो (१)।

माध ॥ सहर्षं ॥

किं वा भणामि विछेददारुणायासकारिणी;
कामं कुरु वरारोहे, देहि मे परिरम्भणं।

माल ॥ सहर्षं ॥ कधं अणुगहीदम्हि ॥ उत्थाय ॥ दूअमालिङ्गामि। दंसणं उण पिअसहीए वाहुपपीडणिरुद्धं अवहिमं न लभदि ॥ आलिङ्ग मानन्दं ॥ सखि, कठोरकमलगर्भपक्षलो अणारिसोज्जेअ दे अज्ज णिव्वावेदि मं सरीरप्फंसो ॥ साशं ॥ किंच। मउलिविणिवेसिदञ्जली मम वअणेण विण्णवेसि तं जणं,जधा,ण मए मन्दभाइणीए,विअसंतपुण्डरीअलच्छीविलासहारिणो संपूण्णचन्दमण्डलाहिरामस्स मुहस्स दे सच्छन्ददंसणेण सम्भाविदो चिरं महूसवो लोअणाणं; (२)

---

(१) सखि अलमनोयत्ते मालतीप्रणामः।

(२) कथमनुगृहीताऽस्मि। दूयमालिङ्गामि। दर्शनं पुनः प्रियसख्यावाहुपपीडनिरुद्धं अपस्मिमं न लभते। सखि, कठोरकमलगर्भपक्षलः सुकुमारोऽन्यादृशएव ते अद्य निर्व्वापयति मां शरीरस्पर्शः। मौलिविनिवेशिताञ्जलिर्मम वचनेन विज्ञापयिष्यसि तं जनं, यथा, न मया मन्दभाग्यया, विकसत् पुण्डरीकलक्ष्मीविलासहारिणः सम्पूर्णचन्द्रमण्डलाभिरामस्य मुखस्यतेस्वच्छन्ददर्शनेन सम्भावितश्चिरं महोत्सवो लोचनानां;

Digitized by Google

सुधामणोरट्ठेहिं अ अविरइविअम्भमाणदुव्वारुव्वेअव्वदूअ रुव्वित्तमाणबंधनं धारिअं हिअअं। गमिआ अ वारंवारं सविसेसदूसहारअदूमणाइअसखीअणा अरीरसन्तावा, कधंवि अदिवाहिदा चन्दादवमलअमारुदप्पमुहा अणत्थपरंपरा; सम्पदं उण णिरासाअम्मि संवुत्तेम्हि, तुएवि पिअसहीए सव्वदा सुमरिदव्वम्हि। एसा अ सिरिमाहवसहत्थणिम्माणमणहरा वउलमाला मालदीजीविदणिव्विसेसं पिअसहीए दट्ठूआ; सव्वधा हिअए धारणीएम्हि (१)।

॥ सकण्ठादपनीय माधवस्य हृदि विन्यस्यन्ती सहर्षोपसृत्य साध्वसोत्कम्पं नाटयति॥

माध॥ अपवार्य॥ हन्त;

---

(१) सुधामनोरथैरविरतविजृम्भमाणदुर्वारोद्वेगव्यतिकरो दृत्तमानबन्धनं धारितं हृदयं। गमिताश्च वारं वारं सविशेष दुःसहारब्धदुर्मनायितसखीजनाः शरीरसन्तापाः, कथमप्यतिवाहिताश्चन्द्रातपमलयमारुतप्रमुखा अनर्थपरम्पराः, साम्प्रतं पुनर्निराशायां संवृत्तायां इति; त्वयापि प्रियसख्या सर्व्वदाहं स्मर्त्तव्यास्मि। एषा च श्रीमाधवस्य हस्तनिर्म्माणमनोहरा वकुलमाला मालतीजीवितनिर्विशेषं प्रियसख्या दृष्ट्वा; सर्व्वथा हृदये धारणीया इति।

Digitized by Google

एकीकृतक्षणि निषक्तदृषापपीड
निर्भुग्नपीनकुचकुड्मलयानया मे,
कर्पूरहारहरिचन्दनचन्द्रकान्त
निष्यन्दशैवलसहालहिमादिवर्गः।

माल॥ स्वगतं॥ अहो, सखीभाए मालदी विप्पलद्धा (१)।

माध। अयि सखीदत्तामात्मनिवेदिनी परत्यक्षानभिज्ञे दूयमुपालभ्यसे।

उद्दामदेहपरिदाहमहाज्वराणि,
सङ्कल्पसङ्गमविनोदितवेदनानि,
तत्खेदखिन्नदयितस्मितजीवितानि,
किंवा मयापि न दिनान्यतिवाहितानि ?

सखं। सहि, उवालम्भणिज्जं उवालद्धासि (२)।

कल। अहो, सरसरमणीअदा संविहाणस्स (३)।

मक। महाभागे, एवमेतत्,

त्वं वत्सेति, कथमप्यवलम्बितात्मा
सत्यं जनोऽयमियतोदिवसाननैषीत्;
आबद्धकङ्कणकरग्रणयप्रसादा
मासाद्य, नन्दतु चिराय, फलन्तु कामाः।

---

(१) अहो, सखीकया मालती विप्रलब्धा।

(२) सखि, उपालम्भनीये उपालब्धासि।

(३) अहो, सरसरमणीयता संविधानस्य।

खवं। महाणुभाव, हिअए वि अपडिहदसअंगाहसाहसो अअं अणो; किं दाणिं कडुणाभरणं करं विआरेदि महाभाओ? (१)

माल॥ खगतं॥ हा हद्धी हद्धी, हदस्मि, कण्णआअणविरुद्धं किम्पि एसा उवक्खदि (२)।

॥ प्रविश्य ॥ कामन्दकी। पुत्ति कादरे, किमेतत्?

॥ मालती कम्पमाना कामन्दकीमालिङ्गति ॥

कामं॥ तस्याश्चिबुकमुन्नमय्य॥

पुरश्चूरागस्तदनु मनसो ऽनन्यपरता,
तनुस्खानिर्यस्त्वयि, समभवच्च च तव,
युवा, सोऽयं, प्रेयानिह; सुवदने, मुञ्च जडतां;
विधातुर्व्वैदग्ध्यं विलसतु, सकामोऽस्तु मदनः।

खवं। भअवदि, कमणचउद्दसीरअणीमसाणसञ्चरणणिव्वत्तिदविसमव्ववसाअणिट्ठापिअचण्डपासण्डपअण्डदोद्दण्डसाहसो साहसिओ; क्खु एसो अदो पिअसही उक्कंपिदा (३)।

(१) महानुभाव हृदयेऽपि अप्रतिहतस्वयंग्राहसाहसोऽयं जनः; किमिदानीं कडुणाभरणं करं विचारयति महाभागः?

(२) हा धिक् हा धिक्, हतास्मि; कन्यकाजनविरुद्धं किमप्येषाऽपन्यस्यति।

(३) भगवति, कृष्णचतुर्द्दशीरजनीश्मशानसंचरणनिर्व्वर्त्तितविषमव्यवसायनिष्ठापितचण्डप्रचण्डदोर्द्दण्डसाहसः साहसिकः; खल्वेषः; अतोऽमे प्रियसखी उत्कम्पिता।

Digitized by Google

मक ॥ खंगतं ॥ साधु, सदृक्षिके, साधु; अवसरे खल्वनुरागो प्रकारयोर्गरीयसोरुपन्यासः ।

माल । हा तात, हा अम्ब !

कामं । वत्स माधव ।

माध । आज्ञापय ।

कामं । दृथमनेषामन्तमसकोलंपरामरक्षितचरणाम्बु जेरमात्यभूरिवसोरेकमपत्यरत्नं, मालती, भगवता सहस्रभ योगरसिकेन वेधसा, मन्मथेन, मया च, तुभ्यं प्रदीयते ॥ इति रोदिति ॥

मक । फलितं हि तवार्हि भगवतीपादप्रसादेन ।

माध । तत्किमिति वाष्पायितं भगवत्या ?

कामं ॥ सोदराङ्गुलेन नेत्रे परिमृज्य ॥ विज्ञापयामि कस्या खिलं ।

माध । मन्त्राज्ञापय ।

कामं । परिणतिरमणीया: प्रीतयस्तद्विधाना
महमपि तव मान्या, हेतुभिस्तैस्तैस्त,
तदिह सुवदनायां तात मत्तः परस्यां
त्वरिचयकरुणायां सर्व्वथा मा विरंसीः ।

॥ इति पादयोः पतितुमिच्छति ॥

माध ॥ निवारयन् ॥ अहो, वात्सल्यादतिक्रामति प्रसङ्गः ।

मक । भगवति,

Digitized by Google

साध्वान्वेति, नयनोत्सवकारिणीति,
निर्व्यूढसौहृदभरेति, गुणोज्ज्वलेति,
एकैकमेव हि वशीकरणं वरोरो
युष्माकमेवमिदमित्यथ किं ब्रवीमि ?

कामं। वत्स माधव।

माध। आज्ञापय।

कामं। वत्से मालति।

सवं। आणवेदु भअवदी।

कामं। प्रेयो मित्रं, बन्धुता वा समग्रा:,
सर्वे कामा: श्रेयधिर्जीवितं च,
स्त्रीणां भर्त्ता, धर्मदाराश्च पुंसा
मित्यन्योन्यं वत्सयो रितमस्तु।

मक। अथ किं।

सवं। भअवदि, जधा तुह्मे आणवेध।

कामं। वत्स, मकरन्द, त्वमनेनैव वैवाहिकेन मालतीनेपथ्येन प्रसाधितः, परिणयात्मानं ॥ इति पेटकमर्पयति ॥

मक। यदाज्ञापयति भगवती; यावदितश्चित्रजवनिकामन्तर्द्धाय नेपथ्यं धारयामि ॥ तथा करोति ॥

माध। भगवति, सुलभवक्रनर्थमतिसङ्कटमिदं वयस्य।

Digitized by Google

कामं। आः कलमसां चिन्ताधा?

माध। एवं भगवत्येव जानाति।

॥ प्रविश्य ॥ मकरन्दः ॥ विदूषन् ॥ वयस्य, मालत्यस्मि ॥ सर्व्वे सकौतुकं पश्यन्ति ॥

माध ॥ मकरन्दं परिष्वज्य,सोपहासं ॥ भगवति, कृत पुण्यएव नन्दनो, यः प्रियामीदृशीं मनसा मुहूर्त्तमपि काम यिष्यति।

कामं। वत्सौ मालतीमाधवौ, इतो निर्गत्य, वृद्धगृहनेन निर्गम्यतामुद्दामकलसार्थमस्मदिहारिकायाः पश्चाद्यानवाटि कायाः सुविहितं; तत्रैव वैवाहिकद्रव्यजातमवलोकितया सर्व्वं सम्पादितमास्ते; भूयश्च;

गाढोत्कण्ठकठोरकेरलवधूगण्डावपांडुच्छदै,
स्ताम्बूलीपटलैः पिनद्धफलिनव्यानम्रपूगद्रुमा,
कङ्कोलीफलजग्धिमुग्धविकिरद्दाहारिणस्तद्भुवो
भागा, प्रेङ्खितमातुलुङ्गवृतयः, प्रेयोविधास्यन्ति वां।

गत्वा च तत्रैव मकरन्द मद्यन्तिकागमनं यावत् स्थातव्यं। माध॥ सहर्षं ॥ कल्याणान्तरावतंसादि कल्याणसंपदुपरिष्टात् भवति।

कल। दिट्ठिआ एदम्पि णो भविस्सदि

माध। कथं सन्देह एवाचभवतः।

Digitized by Google

लवं। सुदं पिअसहीए।

कामं। वत्स मकरन्द, वत्से लवङ्गिके, दृतदृतः प्रतिष्ठामहे।

माल। सहि तुएवि गंतव्वं।

लवं॥ विहस्स॥ संपदं खु वअं एत्थ उवरामो।

॥ इति निष्क्रान्ताः कामन्दकीलवङ्गिकामकरन्दाः॥

माध। अयमहमिदानीं,

आमूलकण्टकितकोमलवाहुनाल

मार्द्राङ्गुलीदलमनङ्गनिदाघतप्तः;

अस्याः करेण करमाकलयामि कान्त

मारक्तपङ्कजमिव द्विरदः सरस्याः।

॥ इति निष्क्रान्ताः सर्व्वे॥

॥ मालतीमाधवे चौरिकाविवाहोनाम षष्ठोऽङ्कः॥

Digitized by Google

॥ अथ सप्तमोऽङ्कः ॥

॥ ततः प्रविशति बुद्धरक्षिता ॥

बुद्धरक्षिता। अम्महे, सुसिलिट्ठमालदीनेवत्थलच्छीविप्पलब्भणं दक्खिदकरग्गहो अमच्चभूरिवसुमंदिरे, भअवदी वअणसंविहाणेहिं, खेमेण गोपाइदो मअरन्दो॥ नृत्यति॥ अज्ज अम्हेविदमं णन्दणावासं उवगदा; तदो भअवदी णन्दणमापुच्छिअ गदा अवअहं। अअं च, णववङ्गिहप्पवेसविरइदाकालकौमुदीमङ्गलवप्पउत्तिप्पआसोसेसपरिअणो पदोसो अणुजलइस्सदि अज्ज णोम्ववसिदं। सम्पदं खु तुवरंतकामो कामिणीं कामेदुं वड्ढसोम पादवंदनं अक्खत्थिअ, पुणोवि बलामोडिअ अहिदवन्तो, मअरंदेण णिठुरपडिहदो जामादा; स अ अधिअदरवेलक्खखलन्त अक्खरो, रोसणिब्भरदुक्खिदो, रुदिअप्फुरन्तणअणो, ण मे संपदं तुमए कोमारबन्धईए एत्तिओ अणंत्ति, सवदं पदरं काउण, वासभवणादो णिग्गदोत्ति। एदिणा पवङ्केण मदअन्तिअं आणीअ मअरन्देण सह सङ्गोजइस्सं (१)।

---

(१) अम्महे; सुश्लिष्टमालतीनेपथ्यलक्ष्मीविप्रलम्भनन्दन कृतकरग्रहोऽमात्यभूरिवसुमन्दिरे; भगवतीवचनसम्विधानेन क्षेमेण; गोपायितो मकरन्दः। अद्य च वयमिमं नन्दना वसथमुपगताः; ततो भगवती नन्दनमापृच्छ्य गता आव

॥ इति निष्क्रान्ता। प्रवेशकः ॥

॥ ततः प्रविशति प्रत्यागतो मालतीवेशो मकरन्दो लवङ्गिका च ॥

मक। लवङ्गिके, अपि नाम बुद्धरक्षिता संक्रान्ता? भगवती नीतिरविपर्य्ययिष्यति?

लवं। को संदेहो एत्थ महाणुभावस्स? किं वहुणा; जहा एसो मंजीरसद्दो सुणीअदि तहा तक्केमि तेण ववदेसेण आणीदा बुद्धरक्खिदाए मदअन्तिएत्ति, ता उत्तरीआवारिदो पसुत्त लक्खणो चिट्ठदु (१)।

सर्वं। अन्यच्च; नववधूगृहप्रवेशविरचिताकालकौमुदीमहोत्सव प्रवृत्तिपर्य्याकुलाशेषपरिजनः प्रदोषोऽनुकूलयिष्यति अद्य नो व्यवसितं। साम्प्रत खलु त्वरमाणकामः कामिनीं कामयितुंवज्रः सपादवन्दनमभ्यर्थ्य,पुनर्व्वलात्कारेणाभिद्रवन्मकरन्देन निष्ठुर प्रतिहतो जामाता,सचाधिकतरवैलक्ष्यखलदक्षरो,रोषनिर्भर दुःखितो,रुदितप्रस्फुरन्नयनो,न मे त्वया सांप्रतं कौमारबन्धक्या प्रयोजनमिति, सप्रपथं प्रतिज्ञां कृत्वा, वासभवनान्निर्गतइति। एतेन प्रसङ्गेनमदयन्तिकामानीय मकरन्देन सह संयोजयिष्ये।

(१) कः सन्देहोऽत्र महानुभावस्य? किं बहुना; यथा एष मञ्जीरध्वनिः श्रूयते तथा तर्कयामि तेन व्यपदेशेनानीता बुद्ध रक्षितया मदयन्तिकेति; तदुत्तरीयापवारितः प्रसुप्तलक्ष णस्तिष्ठतु।

Digitized by Google

॥ मकरन्दस्तथा करोति ॥

॥ ततः प्रविशति बुद्धरक्षिता मदयन्तिका च ॥

मद। सहि,सच्चंज्जेव्व परिकोविदो मे भादा मालदीए (१)?

बुद्ध। अधरं।

मद। अहो अच्चाहिदं ता एहि वासहीलं मालदीं णिव्भच्छेम्ह ॥ परिक्रामतः ॥ (२)।

बुद्ध। इदं वासभवणदुव्वारं॥ इति प्रविशतः (३)।

मद। सहि, लवङ्गिए, जाणीअदु ता पसुत्ता दे पिअसही णवेत्ति (४)?

लवं। सहि,एहि,माणं पडिबोधेहि,जदो एसा चिरं दुम्मणाअन्ती,इदाणींज्जेव्व ईसं मणुं उज्झिअ पसुत्तेति; तदो सणिअं इधज्जेव्व सअणुप्पन्ते उवविस (५)।

---

(१) सखि, सत्यमेव परिकोपितोमे भ्राता मालत्या?

(२) अहो, अत्याहितं तदेहि वासगृहां मालतीं निर्भर्त्सयामः।

(३) एतद्वासभवनद्वारं।

(४) सखि,लवङ्गिके,जानीहि तावत्प्रसुप्ता ते प्रियसखी नवेति?

(५) सखि, एहि, मैनां प्रतिबोधयिष्यसि यतएषा हि चिरं दुर्मनायमाना इदानीमेव ईषत् मन्युं त्यक्त्वा प्रसुप्तेति; ततः शनैरिहैव शयनीयोपान्ते उपविश।

Digitized by Google

मद॥ तथा कृत्वा॥ सखि, कथं दुर्म्मनायमदि दूअं वामसीला?(१)।

लवं। कहं णाम, णववहूविस्सम्भणीवाअजाणुअं सउअ विअड्ढमहुरभासिणं अरोसणं अ, दे भाअरं भत्तारं समासादिअ पिअसही ण दुम्मणादूअदि (२)?

मद। बुद्धुरक्खिदे, पेक्ख, पेक्ख, विप्पडीअं अम्होवि उवालंभीआमो (३)।

बुद्धु। विप्पडीअं ण विप्पडीअं वा (४)।

मद। कधंविअ?

बुद्धु। जं दाव चलणपडिओवि भत्ता ण वहुमाणिदो, एत्थ लज्जादोसेण एसो जणो ण उआलम्भणिओ, जंपि, पिअसहि, णव वहूविरुद्धरहसोवकमक्खलणवेलक्खविच्छड्डिदमहाणुभावत्तणस्स भादुणो दे वागदं, किंवि अपरिट्ठाणं तेण तुम्हेत्ति (५)।

---

(१) सखि, कथं दुर्म्मनायमाना वामशीला?

(२) कथं नाम नववधूविश्रम्भणोपायज्ञातारं मनोहरविदग्धमधुरभाषिणं सखेहमरोषणञ्च, ते भ्रातरं भर्त्तारं समासाद्य, मे प्रियसखी न दुर्म्मनायिष्यते?

(३) बुद्धुरक्षिते, पश्य, पश्य, विप्रतीपं वयमपि उपालभामहे।

(४) विप्रतीपं नवा विप्रतीपं।

(५) यत्तावच्चरणपतितोऽपि भर्त्ता न बहुमानितो, ऽत्र लज्जादोषेण एष जनो, नोपालम्भनीयः। यदपि, प्रियसखि, नव

किञ्च ॥ संस्कृतमाश्रित्य ॥ कुसुमसधर्माणो हि योषितः; सुकुमारोपक्रमास्वास्वानधिगतविश्वासैः प्रसभमुपक्रम्यमाणाः, सद्यः संप्रयोगे विद्वेषिणो भवन्ति; एवं किल कामसूत्रकारा भणंति।

लवं ॥ सासं ॥ घरे घरे पुरिसा कुलकण्णकाओ समुव्वहन्ति; ण क्खु कोवि लज्जापराधीणं अणवरद्धं सहजसहावं कुल कुमारीअणं, पहरामीति वाआणलेण पज्जालेदि। एदे क्खु दे हिअअसल्लणिक्खेवा, आमरणं सुमरिज्जमाणदुःसहा, पदिघरणि वासवेरग्गकारिणो महापरिभवा, जाणं कदे दत्थिआणं जम्म लाहं जगुच्छन्ति बान्धवाः (१)।

वधूविरुद्धरभसोपक्रमस्खलनवैलक्षविच्छर्दितमहानभावलक्ष भ्रातस्ते वागतं, किमप्यपरिस्थानकं तेन चूयमिति।

(१)गृहे गृहे पुरुषाः कुलकन्यकाः समुद्वहन्ति; न खलु कोऽपि लज्जापराधीनमनपराद्धं मुग्धलावण्यस्वभावं कुलकुमारि काजनं, प्रहरामीति वातानलेन प्रज्वालयति। एते खलु ते हृदयशल्यनिक्षेपाः, आमरणं स्मर्यमाणदुःसहाः पतिगृहिणिवा सवैराग्यकारिणो महापरिभवाः, येषां कृते स्वजनानां जन्म लाभं जुगुप्सन्ते बान्धवाः।

Digitized by Google

मद। अए बुड्ढरक्खिदे अदिदुक्खविदा पिअसही अवलिआ; अदिमहन्तो क्खु कोवि मे भादुणा वा आअवराधो से कदो (१)?

बुद्ध। अधदं; सुदं अन्नेहिं (२)।

मद। सहि, केरिसो।

बुद्ध। मम ण तुए संपदं कोमारबन्धवेण पओअणंत्ति (३)।

मद॥ कधं पिधाव॥ अहो अदिक्कमो; अहो पमादो; सहि अवलिए, असमत्थाम्हि दे मुहंपि सम्पदं दंसिदुं; तधावि पभवामि, किंपि मन्तइस्सं (४)।

अवं। साधीअदे अत्थं जणो।

---

(१) अयि बुद्धरक्षिते अत्युपतापिता प्रियसखी अवलिका अतिमहान् खलु कोऽपि मे भ्राता वागपराधोऽस्याः कृतः।

(२) अथ किं श्रुतमस्माभिः।

(३) मम न त्वया सांप्रतं कौमारबन्धकया प्रयोजनमिति।

(४) अहो अतिक्रमः; अहो प्रमादः; सखि अवलिके, असमर्थास्मि ते मुखमपि साम्प्रतं दर्शयितुं; तथापि प्रभवामीति, किमपि मन्त्रयिष्ये।

Digitized by Google

मद। चिट्ठदु ज्जेव्व मह भादुणो दुःशीलदा; अवरिट्ठाणञ्च तुम्हेहिं एरिसोवि संपदं, जधा, चित्तमणुवत्तणीओ जेण भत्ता एसोत्ति। अन्नंच। णच्च तुम्हे इमस्स किं इत्थीअणअणभिजाद अक्खराहिण्णवेओवालंभस्स जं मूलं तं ण जाणध (१)।

सवं। कधं वा आगदंपि, णाम, ण जाणीमो (२)।

मद। जं दाणिं तस्सिं महाणुभावे माधवे किंपि किल माल दीए वाआमेत्तअं आसी। तहिं, अ सव्वलोअस्स अदिभूमिङ्गदो प्पवादो; ता क्खु एदं विअभ्भदि। ता, पिअसही, जधा एसभत्तुणो अवक्खाहिणिवेसो णिरवसेसं हिअआदो उद्धरीअदि तधा करेध; अधा, महादोसोत्ति जाणिदं भोदु। णिक्कंपदा हणो क्खु अणकाओ दुआवेदि हिअअं मणुस्साणं; हरिसो दुरभिसंगेति मा भणिस्सध मदअन्तिआए कधिदंत्ति (३)।

---

(१) तिष्ठत्वेव मम भ्रातुर्दुःशीलता; अपरिस्खानञ्च युष्माभिरीदृशोऽपि सांप्रतं, यथा, चित्तमनुवर्त्तनीयः येन भर्त्ता एष इति। अन्यच्च। नच यूयमेतस्य स्त्रीजनानभिज्ञानाचरा धिक्षेपोपालम्भस्य यन्मूलं तत् न जानीथ।

(२) कथं वागतमपि, नाम, न जानीमः।

(३) यदिदानीं तस्मिन्महानुभावे माधवे किमपि किल मालत्यावाचामेवैकमासीत्, तच्च सर्व्वलोकख्यातिभूमिं गतः

लवं। अए असावधाणे, असम्बद्धलोअपवादमोहिदे, अवेहि; ण तुए सह किंपि मन्तिदव्वं (१)।

मद। सहि, पसीद, पसीद; अहवा ण तुम्हे अपुढं भणिदा अच्छिदु। किंअ। अम्हे सच्चकं ज्जेव्व माहवेक्कमअजीअलोअं मालदीं खु ण जाणीमो? केण वा कठोरकेदअगब्भविब्भमावअवदोब्बल्लणिव्वत्तिअसुन्दरत्तणविसेसं, माहवसहत्थणिआविद वउलावलीविरइदकंठावलंबमेत्तसञ्जीवणं मालदीए, माहवस्स अ पभातचन्दमण्डलापाण्डुरपरिक्खामरमणीअदंसणं ण विभाविदं सरीरं? (२)

प्रवादः तत्खल्विदं विजृम्भते। तत्प्रियसखि, यथा एष भर्त्तुरप त्याभिनिवेशोनिरवशेषं हृदयादुद्धियते तथा कुरुत; अन्यथा महादोषदुर्गतिः, ज्ञानं भवतु। निष्कारुण्यहारुणा खलु कन्यका उप तापयति हृदयं मनुष्याणामीदृशी दुरभिसन्धेति मा भविष्यथ, मदयन्तिकया कथितमिति।

(१) अयि असावधाने, असम्बद्धलोकप्रवादमोहिते, अपेहि; न त्वया सह किमपि मन्त्रयितव्यं।

(२) सखि, प्रसीद, प्रसीद; न यूयमस्पृष्टमनन्यचेष्टित। किन्तु वयं सत्यमेव माधवैकगतजीवितां मालतीं खलु न जानीमः? केन वा कठोरकेतकगर्भविभ्रमावयवदौर्बल्यनिर्वर्त्तित

ण

किंञ्च; तस्मिन्दिवसे कुसुमाकरोद्यानपर्य्यन्तरत्या मुखसमागमे सविभ्रमोल्लसितकौतूहलोत्फुल्ललोचनविलासमसृणसञ्चारचारुतारकाविराजमानविभ्रमा अनङ्गनृत्याचार्य्याकारोपदेशनिर्म्मितवैदग्ध्यमुग्धमधुरा, मयापि न निरूपिता, अनयोर्दृष्टिसम्भेदः? किञ्च; मम भ्रातुर्दानवृत्तान्तं श्रुत्वा तत्क्षणोच्छलितगभीरावेगव्यतिकराङ्कुरितस्खायमानदेहयोरुद्वर्त्तमानमूलबन्धनमिव न लक्षितं हृदयं। किञ्च मयाऽपरमपि स्मृतं।

सुन्दरत्वविशेषं, माधवस्वहस्तनिर्म्मितवकुलावलीविरचित कण्ठावलम्बमाचरञ्जीवनं मालत्या, माधवस्य प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामरमणीयदर्शनं न विभावितं भवेत्?

(१) किञ्च; तस्मिन् दिवसे कुसुमाकरोद्यानपर्य्यन्तरत्या मुखसमागमे सविभ्रमोल्लसितकौतूहलोत्फुल्ललोचनविलासमसृणसञ्चारचारुतारकाविराजमानविभ्रमा अनङ्गनृत्याचार्य्याकारोपदेशनिर्म्मितवैदग्ध्यमुग्धमधुरा, मयापि न निरूपिता, अनयोर्दृष्टिसम्भेदः? किञ्च; मम भ्रातुर्दानवृत्तान्तं श्रुत्वा तत्क्षणोच्छलितगभीरावेगव्यतिकराङ्कुरितस्खायमानदेहयोरुद्वर्त्तमानमूलबन्धनमिव न लक्षितं हृदयं। किञ्च मयाऽपरमपि स्मृतं।

Digitized by Google

मद। जं क्खु मम तस्स जीविदप्पदाइणो महाणुभावस्स चेदणापडिलम्भपिअणिवेदिआए मालदीए, भअवदीविअड्ढवअणोवण्णासबोधिदेण, हिअअं जीविदं अ माहवेण पारितोसिअत्तणेण सअंगाहसाहसे णिउत्तं। अह अ, तहिं लवङ्गिए; तुएज्जेव भणिदं, पडिच्छिदो क्खु णो पिअसहीए अअं पसादोत्ति (१)।

लव। अं, सहि, कदमो उण महाभागोत्ति विसुमरिदंमए (२)।

मद। सहि, सुमर, सुमर; जेण तस्सिं दिअसे विकटदुट्ठसद्दूलावदेसकालगोअरं गदा अमरसा, तक्कालसंविहिदेण जीविदप्पदाइणा वीअरभुअत्तंभसआविदनिक्कारणबान्धवेण सअंभुवेक्खारणिअदेहोवहारसाहसं कदुअ, परिरक्खिदम्हि; जेण अदिढ दाढाविदारिअविअडमंसलुत्ताणपरिणाहिक्खत्तसलच्छएण जरठजज्जरिदजवापीडहारिणा कण्णेक्कमणेण मम कदे विसहिदा अतिदुट्ठसद्दूलणहरसिहावज्जप्पहारा, मारिदो अ सो दुट्ठसद्दूलो महारक्खवेत्ति (३)।

---

(१) यत्खलु मम तस्य जीवितप्रदायिनो महानुभावस्य चेतनाप्रतिलम्भप्रियनिवेदिकायामालत्याः, भगवतीविदग्धवचनोपन्यासबोधितेन, हृदयं जीवितञ्च माधवेन पारितोषिकतेन स्वयं साहसाहसे नियुक्तं। अथच, तत्र लवङ्गिके, त्वयैव भणितं, प्रतिष्ठितः खलु नः प्रियसख्या अयं प्रसादइति।

(२) सखि कतमः पुनर्महाभागइति विस्मृतं मया।

(३) सखि, स्मर, स्मर; येन तस्मिन् दिवसे विकटदुष्ट

अवं। ऊं, मअरन्दो।

मद॥ सागन्दं॥ पिअवदि, किं भणासि।

अवं। ननु भणामि मअरन्दोत्ति

॥ सस्पृहं॥ अरीरमखाःस्वप्नजी संस्कृतमाश्रित्य॥

वयं तथा नाम यदात्थ किं वदा
म्यथस्य कस्मादिकृतः कथान्तरे
कदम्बगोलाकृतिमाश्रितः कथं
विभुद्भुमुग्धः कुसुकन्यकाजनः?

मद॥ सलज्जं॥ सहि, कीस मं उवहससि? सं भणामि, किन्वा वेदि मं तादिसस्स अणणिरवेक्खस्स अकारणो किदमकवलिअं तजीविदवसामोडिअपाणअणमुद्दरोवआरिणो जणस्स,

---

आर्दूलापदेशकालगोचरं गता अप्सरसा, तत्क्षणसन्निहितेन जीवितप्रदायिना पीवरभुजलम्बनावलम्बितनिष्कारणबान्धवेन सकलभुवनैकसारनिजदेहोपहारसाहसंलब्धा, परिरक्षितास्मि, येन च दृढदंष्ट्राविदारितकिंकटमांसलोत्तानपरिणाहिवक्षस्थल लाञ्छनेन जरठजर्जरितजवापीडहारिणा करुणैकमनसा मम कृते विशीर्णा अतिदुष्टआर्दूलनखशिखावज्रप्रहारा, मारितस्य, स दुष्टआर्दूलोमहाराजस्य इति।

संकथासु णाममहणसुमरणाइं; अ, तधावि, सो तुएवि, गाढप्पहारवेअणारंभविसारिदसरीरसंगलिदखेअसलिलुप्पीलो मोहमीलणासण्णणेत्तकंदोट्टजुअलो भूमिविगलिदासिलदाविट्ठंभधीरत्तणधारिदसरीरो पच्चक्खीकदो व्वेव्व, मदअन्तिआणिमित्तमत्तविच्छड्डिअमहामहग्घजीवलोओ महाभागो अत्ति (१)

॥ मदयन्तिका खेदादोष्विकारान्नाटयति ॥

बुद्ध। ववसिदं पिअसहीए सरीरेण (२)।

मद। पिअसहि, अवेहि, अवेहि, उज्झिअस्सि सहवासिणीए विस्सम्भेण (३)।

---

(१) सखि, किं मामुपहससि? ननु भणामि, निर्व्यापयति च मां तादृशस्य आत्मनिरपेक्षव्यवसायिनः कृतान्तकवक्त्रात्मानजीवितबलात्कारप्रत्यानयनगुरुतरोपकारिणो जनस्य, सङ्कथासु नामग्रहणस्मरणानि च; तथा च, स त्वयापि, गाढप्रहारवेदनारम्भविसारितशरीरसंगलितखेदसलिलोत्पीडो, मोहमीलनाच्चकन्दोट्टयुगलो भूमिविगलितासिलताविष्टम्भधैर्य्यधारितशरीरः, प्रत्यक्षीकृतएव, मदयन्तिकानिमित्तमात्मापि च्छर्दितमहामहार्घजीवलोको महाभागइति।

(२) व्यवसितं प्रियसख्या शरीरेण।

(३) सखि, अवेहि, उज्झितासि सह वासिन्यापि विश्रम्भेण।

सवं। सखि मदयन्तिए, अम्हेवि जाणिदव्वं जाणीमो; ता पसीद, विरम ववदेसादो; एहि विस्सम्भगब्भकधाणुबन्धसरिसं सुहं चिट्ठम्ह (१)।

बुद्धु। सोहणं सवत्तिआ भणादि (२)।

मद। विधेअम्हि संपदं पिअसहीणं (३)।

सवं। जदि एवं ता कधेहि, कधं णु दे कालो गच्छदित्ति(४)।

मद। णीसामेहि; पिअसहि; मम बुद्धरक्खिदापरोक्खवादपवएण पढमंज्जेव्व तस्सिं जणे अदिभूमिगदो अणुरागो। अवि अ। तस्सिं जणे भरिदुव्वरन्तकोदूहलुक्कण्ठामणोरहं हि अग्गं आसि; तदो विधिणिओअणिउत्तदंसणा भविअ दुव्वार दारुणाणंगदुःखसंदाविदुक्कण्ठिअचित्तविहडन्तजीविआ सआ विदण्हि, विस्संभिदपुव्वसव्वङ्गसंज्जलिदमअणउअवड्ढामदु; सहाआसदुसणा अन्तपरिअणा पचाआविमोक्खमेत्तसुलहम

---

(१) सखि मदयन्तिके, वयमपि ज्ञातव्यं जानीम एव, तत् प्रसीद, विरम व्यपदेशात् एहि विस्रम्भगर्भकथानुबन्ध सदृशं सुखं तिष्ठामि।

(२) शोभनं सवत्निका वदति।

(३) विधेयास्मि सांप्रतं प्रियसखीनां।

(४) यद्येवं तत्कथय, कथन्नु ते कालो गच्छतीति।

Digitized by Google

रणनिव्वाणपडिउलवुड्ढरक्खिदावअवट्ठिदावेअव्वरअविसं
ठुला दूमं ओअलोकपरिवत्तमणुभवामि; सद्धप्पसिविणंतरेसु
अ मण्णे रउमादसोहिदा, पेक्खामि अ तं जणं, सचावि, पिअ
सहि मुउत्तणिव्वूढविग्घअविसंठुलुव्वेल्लवित्थरन्तलक्खिदेणपुण्ड
रीअतंडवुक्खण्डप्पहूढमेरेअमअघुसिअं विअ चिरं णिज्झाएदि
मं। किंअ। कवलिदारविन्दकेसरकसाअकण्ठकलहंसघोसघर्घ
रक्खलिदंगभीरभारदीभरिदकण्णविवरं मं, पिए मदअन्तिए
एहित्ति, वाहरदि। अध अ। पप्फुरन्तपओहरुल्लदुन्नरीअअं
सुअच्छलावलग्गणपरिभवेण सभंमुत्तरन्तिअमधमाअन्तहि
अअं मं समुत्तासेदि; सहसा विसज्जिअअंसुअप्पसरिदं, तक्खण
कठोरकमलदण्डाअमाणबाहुवल्लणाववारिअपओहरुग्गमं
विहडन्तविहडमेहलावलअसन्दाणिज्जन्तपीवरूरुपडिबिम्बुवि
अदोवगमनं, पडिजलवादिणीपि मं अवाअरपअत्तणिवत्ति
अमुउत्तकोवोवराअदुःखपरलोकिदहिअअं, णिसिद्धपुणरुत्त
पक्खत्थलेअणविभाविदासेसचित्तसारं, मं उवहसदि। दिउण
बाहुदण्डावेठणणिअन्तिदं, पिअसहि, पहूढसद्दूलकठोरकर
रुहोरप्पहारविअडपत्तावलीपसाहणुत्ताणववच्छत्थलणिट्ठुर
सावेअविजुअमत्थआवद्धकवरोणिहिदकरपरियहोवगिदणा
मिदणिअलमुहावअवसच्छन्दविलासिदविअड्ढअणकमलोवाम
कपोलमूलचिरणिहिदपप्फुरन्तपुञ्जिदाहरसमुग्गदमणुहर
प्फंसणिअत्तभमाविदसरीरसोहं, उल्लसिदसद्दुसाणन्दविसम

अमवलणमोहमन्थरभमन्तलोअणं, किम्पि किम्पि दुम्मिणीदसा हसाणुरूववसाओ मं अवअत्थलीअं अभत्थेहि, पिअसहि, जमकरं सव्वं अणुभविअ, तदो अत्ति सुआरअवरिअं. पुणोवि मंदभाइणी विभावेमि जीअलोअन्ति (१)।

---

(१) निष्क्रामत, प्रियसखि; मम हि तावत् बुद्धरक्षिता परोक्षपातप्रत्ययेन प्रथममेव तस्मिन् अतिभूमिं गतोजनेऽनुरागः। तस्मिन् जने भूतोदृक्तकौतूहलोत्कण्ठामनोरथं हृदयमासीत्; ततोविधिनियोगनिर्दृक्तदर्शना भूत्वा दुर्व्वारदारुणमदनदुःखसन्तापितोत्कण्ठितचित्तविघटमानजीविता सम्भावितास्मि; विजृम्भितपूर्व्वसव्याकुलसंजल्पितमदनज्वरवेदनादुःसहायासदुर्व्वहायमानपरिजना प्रत्यासन्नविमोक्षमाचरसुखमरणनिर्व्वाणप्रतिकूलबुद्धरक्षितावचनवर्द्धितावेगव्यतिकरविसंष्ठुला दृमंजीवलोकपरिवर्त्तमनुभवामि; संकल्पसम्प्राप्तेषु च मनोरथेषु मादमोहिता, पश्यामि तं जनं, सचापि, प्रियसखि, मूहूर्त्तं निर्व्यूढविस्रम्भविसंष्ठुलोद्वेल्लद्विस्रार्य्यमाणरक्तनेत्रपुण्डरीकनाडवोद्भटरूढमैरेयमदघूर्णितमिव चिरं निर्ध्यायति मां। किञ्च। क्वणितारविन्दकेसरकषायकण्ठकलहंसघोषघर्घरस्खलितगभीरभारती भारतकर्णविवरं मां, प्रिये मदयन्तिके, एहि, इति व्याहरति। अथच। प्रस्फुरत्पयोधरस्खलदुत्तरीयांशुकाश्च लावण्यवनपरिभावेन सम्भ्रमोत्तरङ्गि धमधमायमानहृदय

लवं॥ विहस्य॥ सखि मदयन्तिके स्फुटमाख्याहि; अथ तस्मिं अवसरे सिणेहविभ्भमुम्मीसहासविभ्भसन्तबुद्धुरक्खिदालोअणात् णिरूविदं, परिअणादो गोअणीअं, दे आसणमचूलअं समणीअपल्लवटोवारिदं होदि किमवा ण वेत्ति? (१)।

मां समुत्त्रासयति सहसा विसर्जिताश्रुकप्रस्तारां च तत्काल कठोरकमलदण्डायमानबाहुबन्धनापवारितपयोधरोद्गमां विघटमानविकलमेखलावलयसन्दानितपीवरोरुप्रतिषिद्धविप्रतीपगमनां प्रतिकूलवादिनीमपि मामत्यादरप्रयत्ननिवर्त्तितमुहूर्त्तकोपोपरागदुःखपरुषीकृतहृदयां निषिद्धपुनरुक्तपर्य्यस्तलोचनविभावितागेषचित्तसारां मामुपहसति; द्विगुणबाहुदण्डावेष्टननिपीडितां, प्रियसखि, प्रौढग्राहूलकठोरकरुहाक्रमणविकटपत्रावलीप्रसाधनोत्तानवक्षस्थलनिष्ठुरनिवेशनिःसहां मां कृत्वा, सावेगविधूतमस्तकाबद्धकबरीनिहितकरपरिग्रहपुञ्जीकृतोन्नामितनिश्चलमुखावयवस्वच्छन्दविकासितविदग्धवदनकमलोवामकपोलमूलचिरनिहितप्रस्फुरितपुञ्जिताधरसमुद्गतमनोहरस्वेदनिर्भरोद्दर्षितशरीरशोभां, समुल्लसितसाध्वसानन्दविषमसम्भ्रमवलनमोहमन्थरभ्रमल्लोचनां, किमपि किमपि दुर्विनयसाहसानुरूपव्यवसायोमामनभ्यर्थनीयमभ्यर्थयति; प्रियसखि, समक्षञ्च सर्व्वमनुभूय ततोऽस्फुटिति प्रूष्णारण्यसन्निभं पुनरपि मन्दभाग्या विभावयामि जीवलोकमिति।

(१) सखि मदयन्तिके, स्फुटमाख्याहि; अथ तस्मिन्नव

Digitized by Google

मद। अइ असम्बद्धपरिहासशीले, अवेहि, न तुए सह मन्त्रिस्सं (१)

बुद्ध। सहि मदअन्तिए, मालदी पिअसहीअेव्व दूदिं वादुं मंतिदुं जाणादि (२)।

मद। सहि, मा खु एवं मालदीं उवहस (३)।

बुद्ध। सहि मदअन्तिए, पुच्छिस्सं दाणिं दे किंपि, जदि ण विसासभंगं करेसि (४)।

मद। सहि, पुणोवि पणअभङ्गेण किं कदापराहो अअं अणो, जेण एवं भणेसि; पिअसहि, तुमं सवत्तिआए समं सम्मदं मम हिअअं (५)।

सरे खेदविभ्रमोन्मिश्रहासविकसदुद्धुरचिताक्षोचनात्, निरूपितं, परिजनाद्गोपनीयन्ते आसनमधूलकं प्रयतीयप्रच्छद पटापवारितं भवति किं नवेति?

(१) अयि असम्बद्ध परिहासशीले, अवैहि, न त्वया सह मन्त्रयिष्यामि॥

(२) सखि मदयन्तिके, मालती प्रियसख्येव दूतकर्माणि मन्त्रयितुं जानाति।

(३) सखि, मा खल्वेवं मालतीमुपहस।

(४) सखि मदयन्तिके, प्रच्छामीदानीं ते किमपि, यदि मे विश्वासभङ्गं न करोषि।

(५) सखि, किं पुनरपि प्रणयभङ्गेन कृतापराधोऽयं जनो, येनैवं भणसि; प्रियसखि, सपत्न्या समं त्वं सात्मतं मे हृदयं।

Digitized by Google

बुद्ध। जइ दे कधंवि मअरन्दो पुणोवि दंसणपधं आअ दरि, तदो किं तुए कादव्वं (१)?

मद। एक्केक्कावअवणीसङ्गलग्गणिच्चलं चिरं लोअणे णिव्वावइस्सं (२)।

बुद्ध। अध सोवि मम्महबलक्कारिदो, कदंप्पजणणीं तुमं रुक्खिणीविअ पुरुसोत्तमो सअंगाहसधम्मचारिणीं करेदि तदा का पउत्ती (३)?

मद॥ निःसत्त॥ कीस मं एत्तिअं आसासेध (४)!

बुद्ध। सहि, कहेहि।

लवं। कधिदंप्पेव्व हिअअआवेअसूअणेहिं दीहणीसासेहिं (५)।

---

(१) यदि ते कथमपि मकरन्दः पुनरपि दर्शनपथमवतरति, तदा किं त्वया कर्त्तव्यं?

(२) एकैकावयवनिःसङ्गलग्ननिश्चले चिरं लोचने निर्व्वापयिष्ये।

(३) अथासावपि मन्मथबलात्कारितः, कन्दर्पजननीं त्वां रुक्मिणीमिव पुरुषोत्तमः स्वयंग्राहसधर्म्मचारिणीं करोति, तदा का प्रवृत्तिः?

(४) सखि, किमेतावदाश्वासयसि मां!

(५) कथितमेव हृदयावेगसूचकैर्दीर्घनिश्वासैः।

Digitized by Google

मद० । सखि, काअहं दूमस्स तेणज्जेव अत्ताणअं पणीकदुअ दुट्ठसद्दूलकवलादोकड्ढिदस्स तस्सज्जेव केरअस्स अत्तणो सरीरअस्स (१)।

लवं० । सरिसं महाणुभावदाए (२)।

बुद्धु० । सुमरिहसि एदं वअणं (३)।

मद० । कधं, दुदीअपहरणाडिआविच्छेदपडहो ताडीअदि; ता जाव णन्दणं णिब्भत्थिअ, सपाअपडणं अभत्थिअ मालदीए उवरि अणुकूलइस्सं (४)॥ इति उत्थातुमिच्छति॥

॥ मकरन्दो मुखमुद्घाट्य हसेन गृह्णाति॥

मद० । सखि मालदि विबुद्धासि॥ विलोक्य सहर्षं ससाध्वसञ्च॥ अम्मो, अणज्जेव किंपि वट्टदि (५)।

---

(१) सखि कामहमस्य तेनैवात्मानं पणीकृत्य दुष्टशार्दूलक वलादाकृष्टस्य तस्यैव कृत्यकरस्यात्मनः शरीरस्य।

(२) सदृशं महानुभावतायाः।

(३) स्मरिष्यसीदं वचनं।

(४) कथं द्वितीयप्रहरनाडिकाविच्छेदपटहस्ताड्यते; तत् यावत् नन्दनं निर्भत्स्य सपादपतनं चाभ्यर्थ्य मालत्या उपरि अनुकूलयिष्यामि।

(५) सखि मालति विबुद्धासि। अन्यदेव किमपि वर्त्तते।

Digitized by Google

मक। रभोरु, संहर भयं, क्षमते विकार
मुत्कम्पिनः स्तनभरस्य न मध्यभागः;
इत्थं त्वयैव कथितः प्रणयप्रसादः
सङ्कल्पनिर्वृतिषु संस्तुतएष दासः।

॥ बुद्धरक्षिता मदयन्तिकामुखमुन्नमय्य संस्तुतमाश्रित्य ॥

प्रेयान्मनोरथसहस्रकृतः स एष,
सुप्तं प्रमत्तजनमेतदमात्यवेश्म,
प्रौढन्तमः; कुरु क्षतघ्नतयैकभङ्ग
मुद्भिन्नमूकमणिनूपुरमेहि यामः।

मद। सहि बुद्धरक्खिदे, कहिं उण अम्हेहि गन्दव्वं (१)।

बुद्ध। जहिं पुव्वंज्जेव मालदी (२)।

मद। किं णिव्वुत्तसाहसा मालदी (३)?

बुद्ध। अधईं; अण्णं च तुमं भणामि॥ ता अहं दमस्सेत्यादि पठति (४)॥

॥ मदयन्तिका अश्रूणि पातयति ॥

बुद्ध। महाभाअ, दिट्ठो क्खु अत्ता पिअसहीए (५)।

---

(१) सखि बुद्धरक्षिते, कुत्रास्माभिर्गन्तव्यं।

(२) यत्रैव पूर्वं मालती।

(३) किं निवृत्तसाहसा मालती?

(४) अथ किं; अन्यच्च त्वां भणामि।

(५) महाभाग, दृष्टः खल्वात्मा प्रियसख्या।

Digitized by Google

मक। अत्यूर्जितं विजितमेव मया किमन्य
दद्योत्सवः फलवतो मम यौवनस्य ;
यस्य प्रसादसुमुखेन समर्पितेयं
देवेन वाग्भवधुरा मकरध्वजेन।

तदनेनपश्चद्वारेण विनिर्गत्य साधयामः॥ निभृतं परिक्रामन्ति॥

मक। अहो निर्गीथनिः सञ्चारस्मणीयता मार्गस्य। तथाहि संप्रति,

प्रासादानामुपरि वलभीतुङ्गवातायनेषु
भ्रान्त्याक्षिप्तः परिचितसुरागन्धसंस्कारगर्भः,
माध्वीमोदी मुहुरुपचितश्चारकर्पूरवासो,
वायुर्यूनामभिनवबधूसन्निधानं व्यनक्ति।

॥ इति निष्क्रान्ताः सर्व्वे॥

मालतीमाधवे सप्तमोऽङ्कः॥

Digitized by Google

अथ अष्टमाङ्कः ।

॥ ततः प्रविशति अवलोकिता ॥

अवलोकिता। वन्दिदा मए णन्दनावासपडिणिउत्ता भअवदी; ता जाव मालदीमाहवसआसंज्जेव्व गच्छामि ॥ परिक्रम्य॥ एदे णिवत्तिद गीह्मदिअहावसाणमज्जणा दीहिअतडिसिलातलं अलङ्करेन्ति, जाव उवसप्पिस्सं(१)। इति निष्क्रान्ता ॥ परिक्रम्य॥ प्रवेशकः ॥

ततः प्रविष्टौ मालतीमाधवौ अवलोकिता च।

माध ॥ स्वगतं सानन्दं॥ वर्त्तते हि मन्मथप्रौढसुहृदो निशीथस्य यौवनश्रीः।

तथाहि। दलयति परिशुष्यत्प्रौढतालीव पाण्डु
स्तिमिरनिकरमुच्चैरिन्दवः प्राक्प्रकाशः;
वियति पवनवेगादुन्मुखः केतकीनां
प्रचलितइव सान्द्रो मन्दमन्दः परागः।

---

(१) वन्दिता मया नन्दनावासप्रतिनिवृत्ता भगवती; तस्माद्यावन्मालतीमाधवसकाशमेव गच्छामि। एते निवर्त्तित ग्रीष्मदिवसावसानमज्जनादीर्घिकातटशिलातलमलङ्कुरुतः। तद्यावदुपसर्पामि।

Digitized by Google

तत्कथं वामभ्रीलां मालतीमुपावर्त्तये; भवत्वेवं तावत् ॥प्रकाशं॥ प्रिये मालति, प्रत्ययसाधनस्नानविशेषप्रीतस्तामच भवतीं निदाघतापभ्रान्त्यै विज्ञापयामि तत्किमिति नित्यमन्य थैव मां संभावयसि?

निश्शेषतस्ते, सुतनु, कबरीविन्दवो यावदेते,
यावन्मध्यस्तनयुगलयोर्नार्द्रभावं जहाति,
यावत्साङ्गप्रतनुपुलकोद्भेदवत्यङ्गयष्टि
स्तावद्गाढं वितर, सकृदप्यङ्गपालीं प्रसीद।

अयि निरनुरोधे।

जीवयन्निव समूढसाध्वसखेदविन्दुरधिकण्ठमर्पयंतां,
वाञ्छरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः।

अथवा, दूरे तावदेतत्; कथमालापसम्बिभागस्याथभाजन मयं जनो भवत्याः।

दग्धं चिराय मलयानिलचन्द्रपादै
र्निर्व्वापितन्तु परिरभ्य वपुर्न नाम;
आमत्तकोकिलरुतव्यथिता तु हृद्या,
मद्यं श्रुतिः पिबतु किन्नरकण्ठि वाचं।

अव ॥ उपसृत्य ॥ अई अणिव्वहनशीले, जं दाणिं मुद्धत्तं अदिट्ठमाहवा दुम्मणाअंती मम पुरदो भणासि; चिरअहि

Digitized by Google

अज्ज उत्तो; अवि णाम कियच्चिरेण पेक्खिस्सं, जेण विच्छड्डिआ सेसमद्धसा विसुमरिदणिमेसविग्घमवलोअअन्ती, एवं भणिस्सं, दिउणावेट्टनपरिरम्भेण सम्भावएज्जि; सम्पदं तस्सिं दे अअं परिणामो (१)।

॥ मालती सासूयमिव तां पश्यति ॥

माध ॥ स्वगतं ॥ अहो भगवतीप्रधानांतेवासिन्याः सर्व्वतो मुखं वैदग्धंम्, अवश्य सुभाषितरत्नसञ्चोषः ॥ प्रकाशं ॥ प्रिये, सत्यमवलोकिता वदति?

॥ मालती तिर्य्यङ्मूर्द्धानं चालयति ॥

माध। आपितासि मां सवक्त्रिकावलोकितयोर्जीवितेन यदि वाचा न कथयसि?

माल। नाहं किंचि जाणामि ॥ इत्यर्द्धोक्ते सज्ज्ञां नाटयति ॥ (२)।

---

(१) अयि अनिर्व्वहणशीले, यदिदानीं मुहूर्त्तमात्रान्तरित माधवापि दुर्म्मनायमाना मम पुरतोभणसि, चिरयत्यार्य्यपुत्रः; अपि नाम कियच्चिरेण प्रेक्षिष्ये, येन विच्छर्दिताशेषसाध्वसा विस्मृतनिमेषविघ्नमालोकयन्ती, एवं भणिष्यामि, द्विगुणावेष्टन परिरम्भेण सम्भावये, इति; सांप्रतं तस्मिंस्तेऽयं परिणामः।

(२) नाहं किमपि जानामि।

Digitized by Google

माध। अहो अनवसितार्थमन्तरस्य वचसस्मारुता ॥ सहसा निरूप्य ॥ अवलोकिते, किमेतत्?

वाष्पाम्भसा मृगदृशो विमलः कपोलः
प्रक्षाल्यते सपदि राजतएष यस्मिन्;
गण्डूषपेयमिव कान्यमृतं पिपासु
रिन्दुर्निवेशितमयूखमृणालदण्डः।

अव। सखि, किं दाणिं उच्छलिदवाहजलसमन्तरा रोदिसि (१)।

माल ॥ अणाल्हिकं ॥ कियचिरं पिअसहीए लवङ्गिआए असन्निधाणदुःक्खमणुभविस्सं पउत्तिलम्भोवि से सुदुल्लहोत्ति (२)?

माध। अवलोकिते, किं नाम?

अव। तुहम्मेव सवधोवएसेण एसा लवङ्गिअं सुमरिअ, ताए पउत्तिणिमित्तं उत्तम्भदि।

माध। नन्विदानीमेव मया कलहंसकः प्रहितः, प्रच्छन्नः सन्निपत्य नन्दनावासं प्रवृत्तिमुपलभतेति ॥ साशंसं ॥ अवलोकिते, अपि नाम बुद्धरक्षिताप्रयत्नः सफलोदर्कएव मदयन्तिकां प्रति स्यात्?

---

(१) सखि, किमिदानीमुच्छलितवाष्पोत्पीडनेमन्तरा रोदिषि

(२) सखि, कियचिरं प्रियसख्यालवङ्गिकायाअसन्निधानदुःखमनुभविष्यामि प्रवृत्तिलम्भोऽपि तस्यादुर्लभइति।

(३) तवैव अपथोपन्यासेन एषा लवङ्गिकां स्मृत्वा, तस्याः प्रवृत्तिनिमित्तमुत्ताम्यति।

Digitized by Google

अव। कुदोसन्देहो महाणुभावस्स? महाभाग, पढमंज्जेव्व सद्दूलनहराखङ्कितस्स मअरन्दस्स मोहविराममहूसवं णिवेद अन्नीए भअवदीए, णिउत्तेण भअवदा मालदीए समं जीविदेण, पसादीकिदं हिअअं जदि कोवि तुमं मदअन्तिआलम्भेण संपदं वड्ढावेदि, किं तस्स पारितोसिअं भविस्सदि? (१)।

माध। अनयानुयोक्तव्यमनुयुक्तोऽस्मि॥ हृदयमवलोक्य॥ हृदयमस्ति मालतीप्रथमदर्शनाभिषङ्गसाक्षिणः कामकानना लङ्कारस्य लक्ष्मीवतः केसरतरोः प्रसवमाला।

प्रेक्षा मङ्गथितेति या प्रियसखीहस्तोपनीतानया
विस्तारिस्तनकुम्भकुम्भलभरोत्सङ्गेन सम्भाविता;
सम्प्राप्ते त्वय पाणिपीडनविधौ मां प्रत्यधेताशया
यामप्येव सवङ्किकेत्यवगते सर्व्वंखदायीक्षता।

अव। सहि, मालदि, वल्लहा क्खु दे इअं वउलमाला, तदो अवहिदा भव, अधा एसा सहसंज्जेव दाणिं परहत्थगदा ण भविस्सदित्ति (२)।

(१) कुतः सन्देहोमहानुभावस्य? महाभाग, प्रथममेव शार्दूलनखाङ्कितस्य मकरन्दस्य मोहविरामममहोत्सवं निवेद यन्त्याभगवत्या नियुक्तेन मालत्याजीवितेन समं हृदयं प्रसादीकृतं यदि कोऽपि त्वां मदयन्तिकालम्भेन सम्प्रति वर्द्धा पयति तदा किमिदानीं तस्य पारितोषिकं भविष्यति।

(२) सखि मालति, वल्लभा खल्वियं ते वकुलमाला, ततोऽ ऽवहिता भव, इदानीमप्येषा सहसैव परहस्तगता न भविष्यतीति।

Digitized by Google

माल। पिअंपिअसही मे उवट्ठिअसि (१)।

अव। कधं पदसद्दोविअ।

माध॥ नेपथ्याभिमुखमवलोक्य॥ अये कलहंसकः प्राप्तः।

माल। दिट्ठिआ वड्ढसि मदअन्तिआलंभेण (२)।

माध॥ सहर्षं परिष्वज्य॥ प्रियं नः॥ आत्मनः कण्ठादवतार्य वकुलमालां ददाति॥

अव। णिव्वूढो क्खु भअवदीए संभावणाभारो बुद्धरक्खिदाए (३)।

माल॥ सहर्षं॥ अम्महे पिअसही लवङ्गिआवि दीसदु (४)॥

॥ सर्वे उत्तिष्ठन्ति॥

॥ ततः प्रविशन्ति संभ्राताः कलहंसमदयन्तिकाबुद्धरचिता लवङ्गिकाः॥

लवङ्गिका। परित्ताअदु परित्ताअदु महाभाओ; अद्धुमग्गे क्खु णअररक्खि पुरुसाभिओओ मअरन्दस्स आदो, जदोतक्काल मिलिदेन कलहंसएण सहिदा अम्हे अणुयेसिदाओत्ति (५)।

---

(१) प्रियंप्रियसखी मे उपदिष्टसि।

(२) दिष्ट्या वर्द्धसे मदयन्तिकालम्भेन।

(३) निर्व्यूढः खलु भगवत्याः सभावनाभारो बुद्धरक्षितायाः।

(४) विस्मयः। प्रियसखी लवङ्गिकापि दृश्यते।

(५) परित्रायतां परित्रायतां महाभागो; अर्द्धमार्गे खलु

कल। जधा दूदोमुहागदेहिं अन्नेहिं महन्तो जोधकलकलो सुदो तधा तक्केमि अण्णं पि पारक्कअं बलं उपगदन्ति (१)।

माल। अवलोदूदे, हद्धी, हद्धी; समकालंज्जेव हरिसुव्वेवेदो उवगदो (२)।

माध। सखि मदयन्तिके, स्वागतमेतेन; अनुगृहीतमस्मि दृढं भवत्या; ननु सएवासौ माभूत्परिभवोद्वेगः; किमित्यसखा भवती, एकाकिनो वज्रभिरभियोगदूति न किञ्चिदेतदवसस्स।

पश्य। हरेरतुलविक्रमप्रणयलालसस्याहवे,
सएष भवति क्षणत्कररुहः प्रचण्डः सखा;
स्फुरत्करटकोटरस्खलितदानसिक्ताननं
द्विपेश्वरशिरःस्थिताश्छिदलनैकवीरः करः।

तदहमपि क्रमानरूपं विलसतः प्रियसुहृदः प्रत्यनन्तरी भवामि॥ इति विकटं परिक्रामन् कलहंसकेन सह निष्क्रान्तः॥

नगररक्षि पुरुषाभियोगो मकरन्दस्य जातस्तत्स्वकालमिति तेन कलहंसकेन समं वयमत्रानुप्रेषिता इति।

(१) यथा दूतोमुखागतैर्महान् युद्धकलकलः श्रुतोऽस्माभिस्तथा तर्कयामि अन्यदपि पारक्यं बलमुपगतमिति।

(२) अवलोकित, हा धिक् हा धिक्; समकालमेव हर्षोद्वेगसम्भेदउपगतः।

Digitized by Google

अवलोकिताबवलिकाबुद्धरक्षिताः। अवि णाम अणाहदा पडिणिअंतिस्सन्ति एदे महाणुभाओ (१)।

माल। सहिओ अवलोइदा बुद्धरक्खिदा, तुरिअं गदुअ भअवदीए इमं वुत्तंतं णिवेदह; तुमंवि पिअसहि लवङ्गिए तुरिदं विलवेहि अज्जउत्तं जइ ताव तुम्हाणं अच्छो अणुकम्प णीआ तदो अप्पमत्ता परिक्कमेति (२)।

॥ निष्क्रान्ता अवलोकिताबवलिकाबुद्धबुद्धरक्षिताः ॥

माल। हद्धी ण आणीअदि लवंगिआ किं चिराअदि; कथं एत्तिआ वेला गमिअदुत्ति; भोदु, पिअसखि मदयन्तिए, पिअसहीए लवङ्गिआए पडिणिउत्तिमग्गमणुगमिस्सं (३)।

॥ परिक्रामति ॥

---

(१) अपि नामानाहताः प्रतिनिवर्त्तिष्यन्ते महानुभावाः।

(२) अवलोकिताबुद्धरक्षिते, त्वरितं गत्वा भगवत्या इमं वृत्तान्तं कथयतं; त्वमपि प्रियसखि लवङ्गिके गत्वा त्वरितं विज्ञापयार्य्यपुत्रं, यदि तावद्युष्माकं वयमनुकम्पनीयास्ततोऽप्रमत्ताः परिक्रामतेति।

(३) हा धिक् न ज्ञायते लवङ्गिके किं चिरयति; कथमेतावती वेला गम्यते इति; भवतु, प्रियसखि मदयन्तिके, प्रियसख्या लवङ्गिकायाः प्रतिनिवृत्तिमार्गमनुगमिष्यामि।

Digitized by Google

मद ॥ सातङ्कं ॥ फुरिदं क्खु वामेदरेण लोअणेण (१)।

॥ उपविशति ॥

॥ प्रविश्य ॥ कपालकुण्डला । आः पापे तिष्ठ ।

मालती॥ सचार्सं॥ अज्ज उत्तदृत्थ ट्ठीओ॥ वाक्षम्भं नाटयति॥

कपा ॥ सक्रोधं ॥ नश्याक्रन्द, नश्याक्रन्द ।

लङ्घत्सलः क्व स तपस्विजनस्य हन्ता,
कन्याविटः पतिरसौ परिरक्षति त्वां ;
श्येनावपातचकिता वनवर्त्तिकेव
किञ्चेष्टसे ननु चिरात्कवलीकृतापि !

यावत् श्रीपर्व्वतमुपनीय सवयसमेनां निहत्य दुःखमरणां करोमि ॥ इति मालत्या सह निष्क्रान्ता ॥

मद । अहंपि मालदीमेव्व अणुगमिस्सं॥ परिक्रम्य॥ पिअसहि, मालदि (२ ।

॥ प्रविश्य ॥ लवङ्गिका । सहि मदअन्तिए, लवङ्गिआ क्खु अहं (३)

मद । अवि सम्भाविदो तुए महाणुभाओ (४)।

---

(१) स्फुरितं मे वामेतरेण नयनेन ।

(२) अहमपि मालतीमनुगमिष्यामि प्रियसखि मालति।

(३) सखि मदयन्तिके लवङ्गिका खलु अहं।

(४) अपि सम्भावितस्त्वया महानुभावः।

Digitized by Google

सवं। णहि, णहि; सो क्खु उज्जाणवाडोवणिग्गमादेो ज्जेव्व कलकलं सुणिअ, सावक्खेवावविद्धुविकडोरुदण्डणिब्भरं पधाविअ, पराणीअं पविट्ठो; तदो पडिणिउत्तम्हि मन्दभाइणी, सुणामि अ घरे घरे गुणाणुराअकाअरस्स पौरलोअस्स, हा महाणुभाअ, हा माहव, हा मअरन्द, हा साहसिअत्ति परिदेवणाओ; महाराओपि किल एदाणं मन्तिसुदाणं विप्पलम्भवुत्तंतं सुणिअ, सञ्जाअमच्छराधिक्खेवो, तक्खणविसज्जिदपौढपादकणिवहो चन्दादवेण सौहसिहरट्ठिदो पेक्खदित्ति मन्तीअदि (१)।

मद। हा हदम्हि मन्दभाइणी।

---

(१) नहि, नहि; स खलूद्यानवाटोपनिर्गमादेव कलकलं श्रुत्वा, सावक्षेपावविद्धुविकटोरुदण्डनिर्भरं प्रधाव्य परानीकं प्रविष्टः; ततः प्रभृति निवृत्तास्मि मन्दभागिनी; शृणोमि च गृहे गृहे गुणानुरागनिर्भरस्य पौरलोकस्य, हा महानुभाव माधव, हा मकरन्द, हा साहसिक, इति परिदेवनाः; महाराजोऽपि किलैतयोर्मन्त्रिदुहितोर्विप्रलम्भवृत्तान्तं श्रुत्वा, संजातमत्सराधिक्षेपस्तत्क्षणविसर्जितप्रौढपदातिकनिवहचन्द्रातपेन सौधशिखरस्थितः प्रेक्षितइति मन्यते।

Digitized by Google

सवं। सहि, मालदी उण कहिं? (१)।

मद। सा क्खु पढमंम्मेव दे मग्गमवलोइदुं पसरिदा, पच्छादो अहं ण तं पेक्खामि। अवि णाम उज्जाणगहणे पविट्ठा भवे (२)।

सवं। सहि तुरिदं अम्हेसक्ख। अदिकादरा णो पिअसही इमस्सिं अवसरे अप्पाणं ण धारेहि ॥ त्वरितं परिक्रम्य ॥ सहि मालदि; णं भणामि सहि मालदित्ति (३)॥ इतस्ततः परिक्रामतः॥

॥ प्रविश्य ॥ प्रहृष्टः कलहंसकः। दिट्ठिआ कुसलेण अम्ही णिग्गदा समरसङ्कदुग्गमादो। होमाणहे; पेक्खामि विअणिअ सणिरन्तरुद्धुतधौततरवारिधारापडिफलिदचन्दकिरणुज्ज लविडुविसदंसणं, मदलीलाकलिदकामपालविअटभुजदंडा विडूहलहेलाविअलिदुद्देसदुद्दोलिदकलिन्दतणआसोत्तसंणिहं,

---

(१) सखि, मालती पुनः क्व ?

(२) सा खलु प्रथममेव ते मार्गमवलोकयितुं प्रस्थिता, पश्चादहं न तां पश्यामि। अपि नाम उद्यानगहने प्रविष्टा भवेत्।

(३) सखि त्वरितमस्मिद्याव:। अतिकातरा नः प्रिय सखी अस्मिन्नवसरे न धारयत्यात्मानं। सखि मालति; ननु भणामि मालतीति।

विग्गटविग्गंखणुप्पडिदखिद्दग्गामन्दमग्गरंदवद्दग्गरक्खोभविग्गड पडिग्गोधपडिवग्गखुग्गाद्दसमत्थगग्गणंगणावग्गाखविग्गसल्लक्खक खं पारक्खवखसमूहं (१)।

अविग्ग। सुमरामि भीसखभुग्गवज्जखज्जरिदपंजरावग्गरिद सुभडद्दत्थावखुत्तविविद्दाउद्दखिग्गहघातिद्दासेग्गरिउसेग्गाद्दद विग्गडापसारपारक्काघुग्गन्यमग्गाखग्गारक्खिग्गत्तिद्दविसमसमरग्गा द्दसं वाद्दमाद्दवं। अद्दो गुणाकुराग्गो णरंदस्स, णंदाणिंगोद्दखिद्द रद्दिदावत्तिखपडिद्दारविणग्गोपखाखपडिखमिद्दविरोद्दसं कडो वणीद्दमाद्दवमग्गरंदमुद्दचन्देवारंवारं खग्गारिद्दखिणिद्दखो ग्गणो, कखद्दंखग्गादो ग्गभिग्गणंजाणिग्ग, णिवत्तिद्दमद्दग्धवज्ज माणो, ग्गप्फुरितमत्सरवेल्लक्खमखीमखिखिग्गमुद्देभूरिवसुणंदणे

---

(१) द्दिष्ट्या कुग्रखेन वयं निर्गताः समरसङ्कटदुर्गमात्। द्दीमाणद्देपग्ग्यामीव निरन्तरोद्भूतधीत, तरवारिधाराप्रति फलितचन्द्रकिरणोज्ज्वलितभीषणदर्शनं, मद्खीलाकलितकाम पालविकटभुजदण्डाविद्धद्दखद्देखाविक्खलितोद्देलितनरुक्कलि न्दतनयास्रोतःसन्निभं विकटविघट्टुल्लोत्पतितनिर्द्यामन्द्म करन्द्व्यतिकरक्षोभविकलप्रतियोधपरिवर्त्तनोद्गतसमस्तगग णाङ्गनावकाग्रविग्रकलितकलकर्कं पारक्यवखसमूहं।

मङ्गरवअणोववण्णासेण, किंदाणिं तुह्माणं भुअणाभोअभूसणेहिं महाणुवेभहिं अभिअणदंसणगुणाहिरामेहिं णवचन्ददंसणरमणीएहिं जामादुएहिं परितोसोत्ति, पडिवोहिअ, गदो अब्भन्तरं राआ। इमेवि माहवमअरन्दा आअच्छन्ति। अहम्पि भअवदीए एदं वुत्तं तं निवेदेमित्ति ॥ निष्क्रान्तः ॥ (१)।

॥ ततः प्रविशतो माधवमकरन्दौ ॥

मक। अहो प्रेयसः सर्व्वपुरुषातिशायि निर्व्याजमूर्जितं तेजः।

---

(१) अपिच। स्मरामि भीषणभुजवज्रजर्जरितपञ्जरापसृतसुभटहस्तावलुप्तविविधायुधनिवहघातिताग्रेसरिपुसैन्यहतविकटत्वरितापसारपदातिशून्यमार्गसञ्चारनिवर्त्तितविषमसमरसाहसनाथमाधवं। अहो गुणानुरागो नरेन्द्रस्य, यदिदानीं सौधशिखरान्तरितावतीर्णप्रतीहारविनयोपन्यासप्रतिगमितविरोधसंकटोपनीतमाधवमकरन्दमुखचन्द्रे वारंवारं सञ्चारितस्निग्धलोचनः। कलहंसकादभिजनं ज्ञात्वा, निवर्त्तितमहार्घगुरुवङ्गमानः प्रस्फुरन्मत्सरवैलक्षमसीमखिनितमुखे भूरिवसुनन्दने मधुरवचनोपन्यासेन, किमिदानीं युवयोर्भुवनाभोगभूषणाभ्यामभिजनदर्शनगुणाभिरामाभ्यां नवचन्द्रदर्शनरमणीयाभ्यांजामाहृभ्यां परितोषः, इति प्रतिबोध्य, गतोऽभ्यन्तरं राजा। एतावपि माधवमकरन्दावागच्छतः। अहमपीमं वृत्तान्तं भगवत्यै निवेदयामीति।

तथाहि। दोर्निष्पेषविशीर्णसञ्चयदलत्कङ्कालमुन्मथ्नतः,
प्राग्वीरानुपलभ्य तत्प्रहरणानाच्छिद्य विक्रामतः,
उद्देशद्रुमरण्डखण्डनिकराकीर्णस्य संख्योदधे
र्दैधास्खलितपत्तिपङ्क्तिविकटः पन्थाः पुरस्तादभूत्।

माध। मन्वनुग्रह्यस्थानमेतत्।

अद्यैवाच मधूलखण्डखचितं पीतंनिशीथोत्तरं
यैर्लीलापरिरम्भदायिदयितागण्डूषगूढं मधु;
संप्रत्येव भवद्भुजार्गलगुरुव्यापारमग्नास्त्रिभि
र्गोचैस्तत्कथयंत्यसारविधुरान् प्रायेण संसारिणः।

स्मर्त्तव्यन्तु सौजन्यमस्य नरपतेः यदपराधिनोरण्यनपराधयोरिव नौ कृतप्रसादमधिष्ठितवान्।

मक। तदेहि मालतीसमक्षमधुना मदयन्तिकायाः कस्य हंसकेन रणवृत्तान्तं विस्मरतः कथ्यमानं श्रोतुमिच्छामि।

अन्यच्च।

कथयति त्वयि सस्मितमालती चलितलोलकटाक्षपराहतं,
वदनपङ्कजमुल्लसितत्रपास्मितदृष्टि सखी नमयिष्यति।

॥ इति परिक्रामतः ॥ अयमसावुद्यानवाटः ॥

प्रविशतो माधवमकरन्दौ।

माध। कथं शून्याएव प्रदेशाः।

मक। वयस्य, नूनमस्मद्भीतिरेकोद्वेगपर्य्याकुलत्वादितस्ततः परिभ्रमन्त्यात्मानमेवोद्यानगहने विनोदयिष्यति, तदेहि पश्यावः ॥ उभौ परिक्रामतः ॥

Digitized by Google

लवं। सखि मदयन्तिए, मालदि॥ सहसावलोक्य॥ दिट्ठिआ पुणोवि एदे महाणुभावा दीसंति (१)।

मकरन्दमाधवौ। भवत्यौ; क्व सा मालती।

उभे। कुदो मालदी पदग्गहेण, अम्हे विप्पलद्धाओ मन्दभाइणीओ (२)।

माध। कथं कथमपि;विध्वंसते मे हृदयं; अतः समभिधीयतां।

मम हि कुवलयाक्षीं प्रत्यनिष्टैकबुद्धे
र्भवति हृदयमन्तस्खलतीवान्तरात्मा,
स्फुरति हि खलु चक्षुः स्पष्टमेतच्च वामं,
वचनमिह भवत्योः, सर्व्वथा हा हतोऽस्मि।

मद। तदो क्खु दद्दोणिग्गदे महाणुभावे, अवलोदुदं बुद्धरक्खिदं अम्हदीए सम्मासं पेसिअ, अम्हमत्तणिमित्तं अज्जउत्तं विसवेहित्ति खवङ्गिआ अणुप्पेसिदा; तदो उत्तम्भमाणाए ताए मग्गं अवलोदुदं अग्गदोपरिट्ठिदा; पच्छादे अहं णअ तं पेक्खामि; तदो अम्हेहिं एत्थ विउवन्तराणि जाव विचुण्णिदाणि ताव तुम्हं दिट्ठेत्ति (३)।

---

(१) सखि मदयन्तिके, मालति। दिष्ट्या पुनरपि एते महानुभावादृश्यन्ते।

(२) कुतोमालती पदग्रहेण, वयं विप्रलब्धा मन्दभागिन्यः।

(३) तदा खलु द्रोणिर्गते महानुभावे, बुद्धरक्षिता

माध। हा प्रिये मालति।

किमपि किमपि मन्दं मन्दलेभ्योयदन्यद्,
विरमतु परिहासस्यस्थिरं पर्य्युत्सुकोऽसि।
कलयसि कलितोहं, वल्लभे, देहि वाचं,
भ्रमति हृदयमन्तर्विह्वलं, निर्दयासि।

उभे। हा पिअसहि निर्दयासि।

मक। किमित्यविज्ञाय वयस्य वैक्लव्यमवलम्बते।

माध। सखे, किं त्वमपि नजानासि माधवस्नेह दुःखिताया स्वस्याः कातर्य्यचेष्टितानि।

मक। अस्त्येतत्; किन्तु भगवती पादमूलगमनमप्यार्थयते; तदेहि तत्र, तावत्पश्यावः।

उभे। एवंपि सभाविअहि।

माध। एवं नाम भवतु॥ सर्व्वे परिक्रामन्ति॥

सवलोकिताश्च उभे भगवतीसकाशं विसृज्य, प्रसादनिमित्तं विज्ञापयाम्यार्य्यपुत्रमिति सवल्गिकामनुप्रेष्य, उत्तास्यमानाया स्वस्यामार्गमवलोकयितुमग्रतः प्रस्थिता; पश्चादहं न च तां पश्यामि; ततश्चावाभ्यामिह विहरन्तीभ्यां यावद्विटपान्तराणि विचितानि तावद्युवां दृष्टाविति।

Digitized by Google

मक०। विचिन्त्यात्मगतं।

आता भवेद्भगवतीभवनं सखीनो
जीवन्यथैष्यति, नचेत्यभिशंकितोऽस्मि।
प्रायेण वाऽभवसुहृत्प्रियसङ्गमादि
सौदामिनीस्फुरणचञ्चलमेव सौख्यं।

॥ इति निष्क्रान्ताः सर्वे ॥

इति ॥ मालतीमाधवे अष्टमोऽङ्कः ॥

Digitized by Google

॥ अथ नवमाङ्कः ॥

ततः प्रविशति सौदामिनी। एषास्मि सौदामिनी, भगवतः श्रीपर्व्वतादुपेत्य पद्मावतीमुपसृत्य; मालतीविरहिणः संस्तुत प्रदेशदर्शनासहिष्णोः स्वामं परित्यज्य, सहसुहृदर्गेण दृष्टद्रोणी नैकताम्रप्रवेशं परिभ्रमतोमाधवस्याधुना तदन्तिकमुपयामी ति। भोस्तथाहमुत्पतिता, यथा सकलएवगिरिनगरग्रामसरि दरण्यव्यतिकरस्त्वया परिक्षिप्यते॥पद्मादिलोक्य॥ साधु, साधु।

पद्मावतीविमलवारिविगाहसिन्धु
पारासरित्परिकरच्छलतोविभर्त्ति;
उत्सुङ्गसौधसुरमन्दिरगोपुराट्ट
संघट्टपारितविमुक्तमिवान्तरीक्षं।

अपिच। सैषा विभाति सवणा लक्षितोर्म्मिपङ्क्ति
रभ्यागमे जनपदप्रमदाय यस्याः;
गोगर्भिणीप्रियनवोक्षपमाक्षभारी
सेव्योपकण्ठविपिनावलयो विभान्ति।

॥ अन्यतोऽवलोक्य ॥ अयमसौ भगवत्याः सिन्धोर्दारितर धातलप्रायस्खटप्रपातः।

यच्चत्य एष तुमुलोध्वनिरम्बगर्भ
गम्भीरनूतनघनस्खलितप्रचण्डः,
पर्य्यन्तभूधरनिकुञ्जविजृम्भणोत्थ
हेरम्बकण्ठरचितप्रतिमानमेति।

Digitized by Google

एतास्वन्दनाम्बकर्णसरलपाटलप्रायतरुगहना: परिणत
मालूरसुरभयोऽरुणगिरिभूमय:, स्मारयन्ति खलु तरुणकद
म्बजम्बूवनावनद्धान्धकारगुरुनिकुञ्जगभीरगह्वरोद्गारगोदाव
रीरवमुखरितविग्रहमेखलाभुवो दक्षिणारण्यभूधरान्; अथच्च
मधुमतीसिन्धुसङ्गमोदपावनो भगवान्भवानीपतिरपौरुषेयप्रतिष्ठै:
सुवर्णबिन्दुरित्याख्यायते ॥ प्रणम्य ॥

जय देव भुवनभावन, जय भगवन्निखिलनिगमनिधे, जय
रुचिरचन्द्रशेखर, जय मदनान्तक, जय जगदादिगुरो।

॥ गमनमभिधीय ॥

अथमभिनवमेघच्छायमोत्तुङ्गशानु
र्मदमुखरमयूरीभग्नसंसक्तकेक:,
प्रकुपितबलशीताने:कदम्बिग्धवर्षा,
वितरति कुहरेभ्य: पर्व्वत: प्रीतिमन्ध्रां।

अपिच। दधति कुहरभाजां मत्तभल्लूकयूना
मनुरचितगुरूणि स्थानमभ्यूढतानि;
निरिरकटुकषाय: स्थायते प्रस्रवीना
मिभदलितविकीर्णग्रन्थिनिस्यन्दगन्ध:।

॥ ऊर्ध्वमवलोक्य ॥ कथं मध्याह्न:; तथाह्यत्र सम्प्रति;
काश्मर्य्या: कृतमालमुद्गतदलं कोयष्टिकट्टीकते;
तीराम्भस्कणिभिश्चुम्बितमुखा धावन्त्यप: पूर्णिका:;

दात्यूहैस्त्रिनिम्नस्य कोटरवति स्कन्धे निषीय स्थितं,
वीरुद्गीतकपोतकूजितमनुक्रन्द्रन्त्यधः कुक्कुटाः।
तद्भवतु माधवमकरन्दावन्विष्य, यथाप्रस्तुतं वाक्ष्यामि॥
इति निष्क्रान्ता ॥ विष्कम्भकः।

॥ ततः प्रविशति माधवोमकरन्दश्च ॥

मक ॥ सकरुणं निःश्वस्य ॥

न च प्रत्यागामनुपतति, नो वा रहयति
प्रविच्छिन्नं चेतः, प्रविशति च मोहान्धतमसं।
अकिञ्चित्कुर्व्वाणाः पश्यदृव तस्या, वयमहो
विधातुर्व्वामत्वादिपदि परिवर्त्तामहदमे।

माध। हा प्रिये मालति क्वासि; कथमविज्ञाततत्त्वं मुञ्चसि पर्य्यवसितासि; नन्वकरुणे प्रसीद, रक्षात्मानं मां।
प्रियमाधवे किमसि मय्यवत्सला; ननु सोऽहमेव यमनन्द्यत्पुरा;
अयमुद्गृहीतकमनीयकरुणस्य मूर्त्तिमानिव महोत्सवः करः।
वयस्य मकरन्द; दुर्लभः पुनर्व्वगति तावतः स्नेहस्य सम्भवः।
सरसकुसुमच्छायैरङ्गैरनङ्गमहाज्वर
स्थिरमविरतोन्माथी सोढः प्रतिक्षणदारुणः;
तृणमिव ततः प्राणान्मोक्तुं मनो विधृतं मया,
किमपरमतोनिर्व्यूढं यत्करार्पणसाहसं।

अपिच। मयि विगलितप्रत्यग्रत्वादिवाहविधेः पुरा,
विकलकरणैर्मर्म्मच्छेदव्यथाविधुरैरिव;

Digitized by Google

स्मरमि रुदितैः स्नेहाकूतं तथा व्यतनोदसा
वहमपि यथाभूवं पीडातरङ्गितमानसः।

॥ सावेगं ॥ अहो मुखलु भोः!

दहति हृदयं गाढोद्वेगं द्विधा तु न भद्यते;
वहति विकलः कायोमोहं न मुञ्चति चेतनां;
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्;
प्रभुरतिविधिर्मर्म्मच्छेदी न छिनत्ति जीवितं।

मक। वयस्य माधव, निरवग्रहं दहति दैवमिव दारुणो विरहान्; दृश्यन्ते शरीरावस्था; तदस्य पद्मसरसः परिसरे मुहूर्त्तमास्यतां। अत्र हि।

उन्नालवालकमलाकरमाकरन्द
निष्यन्दसञ्चलनमांसलगन्धबन्धुः,
त्वां प्रीणयिष्यति, पुरा परिवर्त्तमान
कल्लोलशीकरतुषारजडः समीरः।

॥ इति परिक्रम्योपविशतः ॥

मक ॥ स्वगतं ॥ भवत्वेवं तावदन्यतः प्रक्षिपामि ॥ प्रकाशं ॥ वयस्य माधव,

एतस्मिन्मदकलमल्लिकाख्यपद्म
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः
वाष्पाम्भःपरिपतनोद्गमान्तराले,
दृश्यन्तामविरहितश्रियोविभागाः।

Digitized by Google

॥ माधवः सोद्वेगमुत्तिष्ठति ॥

मक०। कथं प्रतिपत्तिशून्यमुत्थाप्यान्यतः प्रवृत्तः ॥ निःश्वस्योत्थाय च ॥ सखे प्रसीद। पश्य;

वामीरप्रसवैर्निकुञ्जसरितामासन्नवापं पयः,
पर्य्यन्तेषु च यूथिकासुमनसामुन्मृष्टिनं आलकैः;
उन्मीलत्कुटजप्रहासिषु गिरेरालम्ब्य सानूनितः
प्राग्भारेषु शिखण्डिताण्डवविधौ मेघैर्विनामाद्यते।

अपिच। जृम्भाजर्जरडिम्बडम्बरघनश्रीमत्कदम्बद्रुमाः,
प्रेक्षाभोगभुवो भवन्ति ककुभः कादम्बिनीश्यामलाः,
उद्यत्कन्दलकान्तकेतकभृतः कच्छाः सरित्स्रोतसा
माविर्भूतशिलीन्ध्रशोभ्रकुसुमस्मेरा वनाली ततिः।

माध०। सखे पश्यामि; किन्तु दुरालोकरमणीयाः संप्रत्यरण्यभूमयः तत्किमेतत्॥ साखं॥ अथवा किमन्यत्;

उत्फुल्लार्ज्जुनसर्ज्जवासितवहत्पौरस्त्यसम्भारनिः
प्रेङ्खोलत्खलितेन्द्रनीलवलयस्निग्धाम्बुदश्रेणयः;
धारासिक्तवसुन्धरासुरभयः प्राप्ता एवाधुना
घर्माम्भोविगमागमव्यतिकरश्रीवाहिनो वासराः।

हा प्रिये मालति।

तरुणतमालनीलवहलोन्नमदम्बुधराः,
शिशिरसमीरणावधूतनूतनवारिकणाः,

Digitized by Google

कथमवलोकयेदमधुना हरिहेतिमती
र्मदकलनीलकण्ठकुहरैर्मुखराःककुभः।

॥ शोकार्त्तिं नाटयति ॥

मक। कोऽप्यतिदारुणोदग्राविपाकः संप्रति वयस्यस्य। ॥ साध्वं ॥ मया पुनर्व्वज्रमयेन कोऽपि विनोदारम्भः॥ निश्चम्य॥ एवं पर्य्यवसितप्रायैव नो माधवं प्रति प्रत्याशा ॥ सभयं विलोक्य ॥ कथं प्रमुग्धएव ॥ आकाशे ॥ सखि, मालति किमपरं विरचु क्रोशसि।

अपहसितबान्धवे त्वया विहितं साहसमस्य दृष्ट्वा,
तदिदानपराधिनि प्रिये सखि, कोऽयं करुणोज्झितक्रमः।

कथमद्यापि नोच्छ्वसिति; हन्त मुषितोऽस्मि दैवेन।

मातर्मातर्दहति हृदयं, ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि;
क्षीदन्ध्येतमसि विधुरो मज्जतीवान्तरात्मा,
विध्वङ्मोहः स्खलति; कथं मन्दभाग्यः करोमि।

कष्टं भोः कष्टं।

बन्धुता हृदयकौमुदीमहो, मालतीवदनपूर्णचन्द्रमाः,
सोऽयमस्य मकरन्दनन्दनो,जीवलोकतिलकः प्रलीयते।

हा वयस्य माधव।

गात्रेषु चन्दनरसो, हृदि मारदेन्दु
र्गानन्दएव हृदये, मम यस्त्वमासीः;

तच्चां निकामकमनीयमकाण्ड एव
काण्डेन जीवितमिवोद्धुरता हृतोऽसि ।

॥ स्मृत्वा ॥

अकरुण वितर स्थितोऽस्मि दृशमतिदारुण देहि मे गिरं,
सहचरमनुरक्तचेतसं प्रियमकरन्दं, कथं न मन्यसे?

॥ माधवः संज्ञां लभते ॥

मक ॥ सोच्छ्वासं ॥ अयमचिरधौतराजपट्टरुचिरमांसल
कुविर्नवजलधरस्तोयशीकरासारेण मे वयस्यं जीवयति; दिष्ट्या
जगच्छूसितन्नावत् ।

माध। तत्कमत्र विधिमे प्रियावार्त्ताहर्त्तारं करोमि ॥
विलोक्य ॥ साधु, साधु;

फलभरपरिणामश्यामजंबूनिकुञ्ज
स्खलिततनुतरङ्गामुक्तरेण स्रवन्तीं,
उपचितघनमांसप्रोढतापिंछनीलैः,
श्रयति शिखरमद्रेर्नूतनस्तोयवाहः ।

॥ सादरमुत्थाय उन्मुखः कृताञ्जलिः ॥

कच्चित्सौम्य, प्रियसहचरं विद्युदालिंगति त्वा
माबिर्भूतप्रणयसुमुखास्वातका वा भजन्ते,
पौरस्त्यो वा सुखयति मरुत्साधु सम्वाहनानां
विभ्रद्भिभ्रत्सुरपतिधनुर्लक्ष्म लक्ष्मीं तनोति ।

Digitized by Google

॥ आकर्ण्य ॥ अयं प्रतिरवभरितकन्दरानन्दितोत्कण्ठकेकानुबन्धिना उत्कूतेन, मामनुमन्यते; यावदर्थये भगवन् जीमूत।

दैवात्पक्षेर्व्यगति विषरसिकया मत्प्रियायाः
दास्यास्यादौ तदनु कथयेर्माधवीयामवस्थां;
आम्रातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः,
प्राणत्राणं कथमपि करोत्याचताख्याः सएकः।

॥ सहर्षं ॥ अहो प्रचलितस्तदन्यच सञ्चरामि ॥ परिक्रामति ॥ मक ॥ सोद्वेगं ॥ कथमिदानीमुन्मादोपरागो माधवेन्दुमाक्रन्दति; हा तात, हा अम्ब भगवति, परित्रायस्व, परित्रायस्व। पश्य माधवावस्थां।

माध ॥ दिष्टद्दिष्ट्या सर्व्वतोवलोक्य ॥ धिक् प्रमादः।

नवेषु क्षोभप्रसवेषु कान्तिर्दुग्धः, कुरङ्गीषु गवेषु यातं,
सतासु नवत्वमिति प्रमथ्य, त्वक्तं विभक्ता विपिने प्रियाम्मिन्।
हा प्रिये मालति इति ॥ मूर्च्छति ॥

मक। सुहृदि गुणनिवासे प्रेयसि प्राणनाथे,
कथमिव सहपांसुक्रीडनप्रौढसख्ये,
प्रियजनविरहाधिव्याधिवेगं दधाने,
हृतहृदय विदीर्य्य, त्वं दिधा न प्रयासि।

माध ॥ आश्वस्योत्थाय। सुखभानुकारः खलु जगति वेधसो निर्म्माणप्रविवेकः, भवत्येवं तावत् ॥ उच्चैः ॥ अयमहं भोः प्रवि

पत्य भूधरारण्यचारिणः सकलान् विज्ञापयामि; ते मां मुहूर्त्तम
यथानदानेनानुगृह्णन्तु।

भवद्भिः सर्व्वाङ्गप्रकृतिरमणीया कुलवधू
रिरक्षैर्दृष्टा, वा विहितमथ वास्याः किमभवत्;
वयोवस्था तस्याः श्रुणुत, सुहृदो यत्र मदनः,
प्रगल्भव्यापारस्थरति, हृदि मुग्धस्य, वपुषि।

कष्टं भोः।

केकाभिर्नीलकण्ठस्थिरयति च वनं ताण्डवादुद्धिखण्डः;
कान्तामन्तःप्रमोदामभिसरति मदभ्रान्ततारस्वकोरः;
गोत्राभूलः कपोतं कुरयति रजसा कौसुमेन प्रियायाः;
कं याचे यत्र तत्र ध्रुवमनवसरग्रस्त एवार्थिभावः?

अथवा। दन्तच्छदारुणिमरञ्जितकान्तदन्त
मुखस्य, चुम्बति बलीवदनः प्रियायाः,
कान्तिप्लवप्रथमपाटलगण्डपालि
पाकारुणस्फुटितदाडिमकान्ति वक्त्रं।

एषप्रियतमास्कन्धविश्रान्तकरोरोहिणीकहस्कन्धविश्रान्त
कन्धरः करी कथमत्राप्यनवसरः।

कण्डूकुण्डलितेक्षणामनुचरीं दन्तस्य कोट्या लिखन्,
पर्य्यायव्यतिकीर्णकर्णपवनैराह्लादिभिर्व्वीजयन्,
अग्रार्द्धेर्नवपल्लवैर्विकिरणैरस्याः क्षितिं कल्पयन्,
धन्यो वन्यमतङ्गजः परिचयप्राग्लाभमभ्यस्यति।

Digitized by Google

अयम्।

नान्तर्व्वर्त्तयति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितं,
नाघ्रातान्तरसः करोति कवलान्यावर्त्तितैः ग्रैवलैः,
दानज्यानिविषादमूकमधुपव्याधस्य दीनाननो,
नूनं प्राणसमाविधोगविधुरस्तंवेरमस्तास्यति।

अलमनेन प्रथासितेन अन्यतः सञ्चरामि ॥ विलोक्य॥ एष यानन्दसहचरीसमाकर्ण्यमानमधुरगम्भीरकण्ठगर्जितध्वनिरपरोमत्तमातङ्गयूथपालः, प्रत्यग्रविकसितकदम्बसंघातसुरभिगीतलामोदवञ्चलसम्बलितमांसलकपोलनिष्यन्दकर्दमितकषायकरटः, समुद्भूतिकमलिनीखण्डविकीर्णपर्णकमलकेसरस्तृणालकन्दकोमलाङ्कुरमाहरन्, अनवरतप्रवृत्तकमनीयतालताण्डवप्रचलकर्णज्यर्जरितजलतरङ्गवितननीहारसमुद्गस्तकुररसारसं सरोऽवगाह्य, विहरति भवलेवमाभाषे। नागपते, साध्वयौवनः खल्वसि, कान्तानुवृत्तिचातुर्य्यमप्यस्ति भवतः ॥ सापवादं॥

लीलोत्खातमृणालकाण्डकवलक्लेदेषु सम्पादिताः,
पुष्पत्पुष्करवासितस्य पयसोगण्डूषसंक्रान्तयः;
सेकः श्रीकरिणा करेण विहितः कामं विरामे, पुन
र्न स्नेहादनराजवालनलिनीपत्रातपत्रं धृतं।

कथमवधीरणानीरसं व्रजति। हन्त मूढएवास्मिन्नेचरे वयस्यमकरन्दोचितं व्यवहरामि; हा वयस्य!

Digitized by Google

धिगच्छ्वसितवैश्रसं मम यदित्यमेकाकिनो,
धिगेव रमणीयतां तदनुभावभावादृते;
मया सह न यस्यथा च दिवसः स विध्वंसतां
प्रमोदमुदगद्धिकां, धिगपरञ्च या मानुषे।

मक०। अये, उन्मादमोहान्तरितोऽपि संप्रत्ययं मां प्रत्य प्रतिकूलः, यतः कुतश्चिद्व्यञ्जकात्प्रबुद्ध एवास्य सहजस्नेहसंस्कारः, सदसन्निहितमेव मां मन्यते ॥ पुरः स्थित्वा ॥ एष पार्श्वचर एव ते मकरन्दो मन्दभाग्यः।

माध०। प्रिय वयस्य, संभावय, परिष्वजस्व मां; प्रियान्तु मालतीं प्रति निराशः परिश्रान्तोऽस्मि इति ॥ मूर्च्छति ॥

मक०। एवं सम्भावयामि जीवितेश्वरं ॥ विलोक्य सकरुणं ॥ हा कष्टं! आविर्भूतमत्परिष्वङ्गोत्कण्ठ एव निस्नेतनोवृत्तस्तत्किमिदानीमाग्रहव्यसनेन सर्व्वथैव मे नास्ति वयस्य इति, परिच्छेदो युक्तः। हा वयस्य!

यत्स्नेहसंज्वरवता हृदयेन नित्य
मावद्धवेपथु विनापि निमित्तयोगात्,
त्वय्यापदोगणयताभयमन्वभावि,
तत्सर्व्वमेकपद एव मम प्रशान्तं।

सखे, वरं तावन्त एवातिक्रान्तामुहूर्त्ताः, तथाविधमपि भवन्तं येषु चेतयमानमनुभूतवानस्मि, इदानीं तु;
भारः कायो, जीवितं वज्रकीलं, काष्ठाः शून्या, निष्फलानीन्द्रियाणि;
कष्टः कालो मां प्रति त्वत्प्रयाणे, शान्तालोकः सर्व्वतो जीवलोकः।

Digitized by Google

तत्किं नु खलु माधवासमवस्थाविष्टा मया भवितव्यमिति जीवामि? भवतु मुञ्चादेव गिरिशिखरात्पाटलावत्यां निपत्य, माधवस्य मरणाग्रेसरो भवामि॥ सकरुणं निष्क्रम्य आलोक्य॥ कष्टं भोः कष्टं!

तदेतदर्पितोत्पलद्युतिशरीरमस्मिन्नभू
न्ममातिदृढपीडनैरपि न तत्प्रियाश्लिष्टनैः,
यदुल्लसितविभ्रमं मधु निपीतवत्यः परा
नवप्रणयविभ्रमाकुलितमालतीदृष्टयः।

आश्चर्यमेकस्याश्चरमे वयसि तावतोगुणसमाहारस्य सन्निवेशः; कथमिवाभूत्। सखे, माधव।

आपूर्णस्य कलाभिरिन्दुरमलो यातस्य राहोर्मुखं,
सञ्जातस्य घनाघनो जलधरः शीर्णस्य वायोर्जवात्,
निर्वृत्तस्य फलेग्रहिद्रुमवरो दग्धस्य दावाग्निना,
त्वं चूडामणितां गतस्य जगतः, प्राप्तोऽसि मृत्योर्वशं।

॥ विचिन्त्य॥ तत्परिष्वजे तावदेवं गतमपि वयस्यं, अर्थितश्चानेन संप्रत्येवायमर्थः॥ परिष्वज्य॥ हा वयस्य, विमलविद्यानिधे, गुणगुरो, मालतीस्वयंग्राहजीवितेश्वर; हा सौन्दर्य्यविनिर्म्मित रतिरमणच्छाय; हा कामिनीहृदयमन्मथ, हा बान्धवपयोनिधि शरचन्द्र, हा कामन्दकीमकरन्दानन्दनमुखचन्द्र, माधव; अथ मच ते जन्मन्यपश्चिमः पश्चिमावस्थां प्रापितोमकरन्दवाङपरिष्वङ्गः; सएष मकरन्दो मुहूर्त्तमपि जीवतीति मैवं मंस्थाः।

आजन्मनः सहनिवासतया मयैव
मातुः पयोधरपयोऽपि समं निपीय;
त्वं पुण्डरीकमुख बन्धुतया निरस्य
मेको निवापसलिलं पिबसीत्ययुक्तं ।

॥ सकरुणं विमुच्य परिक्रम्य च ॥ दूयमधस्तात्पाटलावती, भगवन् गौरीपते, प्रियसुहृदो यच्च मम तत्रैव सम्भवो भूयाद् मुग्ध भूयोऽपि भूयासमनुमज्जरदति ॥ पतितुमिच्छति ॥

॥ प्रविश्य ॥ सहसा सौदामिनी ॥ वारयित्वा ॥ वत्स, अलं साहसेन ।

मक ॥ विलोक्य ॥ अम्ब, कासि? किमहं त्वया प्रतिहतः?

सौदा । आयुष्मन्, किं त्वं मकरन्दः?

मक । मुञ्च; सएवास्मि मन्दभाग्यः ।

सौदा । वत्स, योगिन्यस्मि, मालत्यभिज्ञानस्त्वावधारयामीति ॥ वकुलमालां दर्शयति ॥

मक ॥ सोच्छ्वासं सकरुणं ॥ अयि, जीवति मालती?

सौदा । अथकिं । वत्स, किमत्याहितं माधवस्य यदनिष्टं व्यवसितोऽसि? अथ माधवः क्व?

मक । आर्ये, तमहं प्रमुग्धमेव वैराग्यात्परित्यज्यागतः; तदेहि, त्वरितं सम्भावयावः ॥ त्वरितं परिक्रामतः ॥

माध ॥ आश्वस्य ॥ अयं प्रतिबोधित एवास्मि; केनापि नूनमस्याभिनवजीमूतजलवाहिनः प्रभञ्जनस्यानपेक्षितास्मद्वधोऽयं व्यापारः ।

Digitized by Google

मक०। दिष्ट्या पुनः प्रत्यापन्नचेतनो वयस्यः।

सौदा॥ विलोक्य॥ सम्यदत्युभयोर्मालतीनिवेदितः शरीराकारः।

माध०। भगवन् पौरस्त्यपवन,।

भ्रमय जलदानंभोगर्भान्, प्रमोदय चातकान्,
कलय शिखिनः केकोत्कण्ठान्, कठोरय केतकान्,
विरहिणि जने मूर्छां लब्ध्वा विनोदयति व्यथा
मकरण पुनः संज्ञाव्याधिं विधाय, किमीहसे;

मक०। सुवृत्तमखिलजन्तुजीवनेन मातरिश्वना।

माध०। देव वायो, तथापि भवन्तमेवं प्रार्थये।

विकसत्कदम्बनिकुरम्बपांशुना सह जीवितं वह मम प्रियायतः;
अथवा तदङ्गपरिवासशीतले मयि किञ्चिदीरय, भवाप्युमेगतिः।
॥ कृताञ्जलिः प्रणमति॥

सौदा०। सुसमाहितः खल्वभिज्ञानदर्शनस्यावसरः॥ अञ्ज सौ मालां मुञ्चति॥

माध०॥ साकूतविस्मयहर्षं॥ कथमियमस्मद्विरचितापि यायाः स्तनोद्भेददुर्ललितमूर्त्तिरनङ्गमन्दिरांगणवकुलप्रसवमाला॥ निरूप्य, सहर्षं॥ कः सन्देहः। तथाहि। सएवायमस्याः,

मुग्धेन्दुसुन्दरतदीयमुखावलोक
हेलाविघट्टकलकुट्टहसनिझवाय,
दुर्न्यस्तपुष्परचनोऽपि लवङ्गिकाया
लोभं ततान विषमग्रथितैकभागः।

Digitized by Google

॥ सहर्षोन्मादमुत्थाय ॥ प्रिये मालति, दृष्टं वीक्ष्यसे ॥ सकोप मिव ॥ अयि मदवस्थानभिज्ञे,

प्रयान्तीव प्राणाः, सुतनु, हृदयं ध्वंसतरव;
ज्वलन्तीवाङ्गानि, प्रसरति समन्तादिव तमः;
त्वरा प्रस्तावोयञ्च खलु परिहासस्य विषय
स्तदल्पोरानन्दं वितर मयि; माभूदकरुणा।

॥ सर्व्वतो दृष्ट्वा सनिर्व्वेदं ॥ कुतोऽत्र मालती ॥ वकुलमालां मुद्दिश्य ॥ अयि, प्रियाप्रणयिनि वकुलमाले, उपकारिष्यसि, यतः अतः स्वागतं भवत्याः।

निष्प्रत्यूहाः, प्रियसखि, यदा दुःसहाःसम्भवु
र्दैवोद्दाहव्यसनगुरवो मन्मथोन्माथवेगाः;
तस्मिन् काले कुवलयदृशस्त्वत्समाश्लेषएव
प्राणत्राणं प्रगुणनमभून्मत्परिष्वङ्गकल्पः।

॥ सकरुणं निर्व्वर्ण्य ॥

आनन्दमिश्रमदनज्वरदीपनानि
गाढानुरागरसवन्ति तदा तदा च;
स्नेहाकराणि मम मुग्धदृशस्तवाङ्गे,
कष्टं स्मरामि, तव तानि गतागतानि।

॥ हृदये निधाय मूर्च्छति ॥

मक ॥ उपसृत्य वीजयन् ॥ समाश्वसिहि, सखे, समाश्वसिहि।

माध ॥ आश्वस्य। मकरन्द, किं न पश्यसि कुतोऽपि मालती स्नेहस्य हस्तलाभः; तत्कथं न मन्यसे किमेतदिति।

Digitized by Google

मक। वयस्य दृश्यमार्य्या योगेश्वरी अस्य मालत्यभिज्ञा मस्य नेची।

माध॥ विलोक्य सकरुणं कृताञ्जलिः॥ आर्य्ये प्रसीद; कथय; जीवति मे प्रिया?

सौदा। वत्स, समाश्वसिहि, समाश्वसिहि; जीवति सा कल्याणिनी माधवमकरन्दौ दृष्ट्वा उच्छ्वस। आर्य्ये, यद्येवं तत्क थय कथमेवदृत्तान्तदृति।

सौदा। पुरा करालायतने मालतीमुपहरन्नघोरघण्टः करवालपाणिना माधवेन व्यापादितः।

माध॥ सौद्वेगं॥ आर्य्ये, विरम; परिज्ञातो वृत्तान्तः।

मक। कंदृव।

माध। सखे, किमन्यत्? सकामा कपालकुण्डलेति।

मक। आर्य्ये, अथेवं?

सौदा। एवं यथानिवेदितं वत्सेन।

मक। कष्टं भोः कष्टं।

कुमुदाकरेण मरदिन्दुचन्द्रिका
यदि रामणीयकगुणाय संगता;
सुकृतं तदस्तु कृतमस्त्वयं विधि
र्यदकालमेघविततिर्व्यधूधुजत्।

माध। हा प्रिये मालति; कष्टमतिवीभत्समापन्नासि।

कथमिव तदाभवस्तं, कमलमुखि, कपालकुण्डलायसा,

Digitized by Google

उत्पातधूमलेखाक्रान्तेव कला भगवतः।

भगवति कपालकुण्डले;

निर्माणमेव हि तदा तव मानसीयं,

मा पूतनात्वमुपगाः शिवतातिरोधि;

नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा

मूर्द्धि स्थितिर्न मुषलैरवताडनानि।

सौदा। वत्स, अलमावेगेन;

अकरिष्यदसौ पापमतिर्निष्करुणैव सा,

मा भविष्यमहं तत्र यदि तत्परिपन्थिनी।

माधवमकरन्दौ ॥ प्रणम्य ॥ अतिप्रसक्तमार्य्याचरणैः।

तत्कथय, कथं पुनस्त्वमेवास्माकं बन्धुः।

सौदा। आस्थः खल्वेतत्॥ उत्थाय ॥ दृढमिदानीमहं,

गुरुचर्य्यातपस्तन्त्रमन्त्रयोगाभियोगजां,

दृढामाचेपणीं विद्यामातनोमि शिवाय वः।

॥ इति समाधवा निष्क्रान्ता ॥

मक। आश्चर्य्यमाश्चर्य्यं।

व्यतिकरदव भीमश्यामसो वैद्युतस्य

क्षणमुपहतचक्षुर्वृत्तिमुद्भूय भ्राम्यः।

॥ विलोक्य सभयं ॥

कथमिह न वयस्यस्तत्किमेतत् ॥ विचिन्त्य ॥ किमन्यत्।

प्रभवति हि महिम्ना खेन योगेश्वरीयं।

Digitized by Google

॥ सवितर्कं ॥ किमयमनर्थदूति संप्रति मुग्धोऽस्मि ।

अपिच । अश्लोकविस्मयमपस्मृतपूर्ववृत्त

मुद्भूतनूतनभयज्वरजर्जरं नः;

एकक्षणच्युटितषट्टितप्रमोह

मानन्दशोकमवलम्बमुपैति चेतः ।

तद्चैव कान्तारगहने सहासदर्गेण प्रविष्टां भगवतीमन्विष्य तस्यावृत्तान्तमेनं कथयिष्यामीति ॥ निष्क्रान्तः ॥

मालतीमाधवे नवमोऽङ्कः ।

Digitized by Google

अथ दृश्यमाङ्कः ।

॥ ततः प्रविशति कामन्दकी मदयन्तिका लवङ्गिका च ॥

कामं॥ साखं। हा वत्से मालति, मदसंकारकारिणि, क्वासि; देहि मे प्रतिवचनं।

आजन्मनः प्रतिमुहूर्त्तविशेषरम्या
याचेष्टितानि तव संप्रति तानि तानि,
चाटूनि चारुमधुराणि च संस्मृतानि,
देहं दहन्ति, हृदयं च विदारयन्ति ।

॥ आकाशे ॥ अपि च पुत्रि ।

अनियतरुदितस्मितं विराजत् कतिपयकोमलदन्तकुड्मलाग्रं,
वदनकमलकं शिशोः स्मरामि, स्खलदसमञ्जसमंजुजल्पितं तत्।

मदयन्तिकालवङ्गिके ॥ साखमाकाशे ॥ हा पिअसहि, सुप्पसण्णमुहचन्दसुन्दरि, कहिं गदासि; को वा सिरीसकुसुमसुउमारस्स दे सरीरस्साअं देव्व दुव्विणअपरिणामो अक्केक्खिआए उवगदो; महाभाअ माहव उपत्यिदत्थमिदमक्खअणो दे जी अलोओ संवुत्तो ।(१)

---

(१) हा प्रियसखि, सुप्रसन्नमुखचन्द्रसुन्दरि, क्व गतासि; कोवा शिरीषकुसुमसुकुमारस्य ते शरीरस्यायं दैवदुर्विनय

Digitized by Google

कामं॥ घविग्घिअखेदं॥ हा वत्सो,

अभिनवरागरसोऽयं भवतोः कृतकौतुकः परिष्वङ्गः,

लवलीलवङ्गयोरिव विघटिमहावात्यया विहृतः।

लवं॥ सोदेगं॥ हद्धाम, वज्रमय सर्व्वथा निर्घृणोसि हृदय।

॥ इति हृदयमाहत्य पतति॥ (१)

मदं। सखि लवङ्गिके, नं भणामि क्षणमात्रमपि तावत् समाश्वसिहि (२)।

लवं। सखि, किं करोमि, दृढवज्रलेपप्रतिबद्धनिश्चलं मम जीवितं न मां परित्यजति (३)।

कामं। वत्से मालति, जन्मतः प्रभृति वल्लभा ते लवङ्गिका, तत्किमेनामुज्झित्वा जीवितं परित्यक्तुकामासे।

दृश्यं हि। उज्झन्नालोकयता स्निग्धा त्वया त्यक्ता न राजते,

मलीमसमुखी वर्त्तिः प्रदीपस्थिखया यथा।

परिणामएकाकिन्याउपगतः; महाभाग माधव उपस्थिता खलितमहोत्सवस्ते जीवलोकः संवृत्तः।

(१) हा हतास्म, वज्रमय सर्व्वथा नृशंसमसि हृदय।

(२) सखि लवङ्गिके, मनु भणामि क्षणमात्रमपि तावत् समाश्वसिहि।

(३) सखि, किं करोमि, दृढवज्रलेपप्रतिबद्धनिश्चलं मम जीवितं न मां परित्यजति।

Digitized by Google

कथं, कथ्याहि, कामन्दकीं जहाहि; मन्थकरण्डे मदीय जीवरोधमेव ते प्रगुणीकृतान्यंगानि।

स्तन्यत्यागात्प्रभृति सुमुखीदत्तपाश्चात्यिकेव,
क्रीडायोगं तदनु विनयं प्रापिता वर्द्धिता च;
लोकश्रेष्ठे गुणवति वरे स्थापिता त्वं मयैव,
खेदो मातुर्भवति समधिकस्तेन युक्तस्तवापि॥

॥ सवैक्लवं॥ चक्रमुखि, संप्रति निराशाम्हि;

अकारणक्षोरमनोहरानना,
त्रिखाखलाटार्पितगौरसर्षपः,
तयाङ्गगामी परिदृप्तभाग्यया
मया न दृष्टः स्तनयस्तनन्धयः।

सवं। भअवदि पसीद; णीसहम्हि सम्पदं जीवलुम्बणे;ता हमादो गिरिसिहरादो अत्ताणअं अवधुणिअ णिव्वुदा भविस्सं; तधा मे भअवदी आणिःप्पसादं करेदु, जेण जम्मन्तरेवि दाव पिअसहीं पेक्खिस्सं(१)

---

(१) भगवति प्रसीद; निःसहास्मि संप्रतं जीवलोभने; तस्माद्गिरिशिखरादात्मानं पातयित्वा निर्वृता भवेयं; तथा मे भगवती आज्ञाःप्रसादं करोतु, येन जन्मान्तरेऽपि प्रिय सखीं प्रेक्षिष्ये।

Digitized by Google

कामं। ननु सवयस्ये, कामंदक्यापि नातः परं वत्साविषो गेन जीवितव्यं, समस्यायमुत्कण्ठावेगश्रावयोः।

किञ्च। संगमः कर्मणां भेदाद्यदि न स्यादनागमः,
प्राणानान्तु परित्यागे, सन्तापोपरमः फलं।

सवं। जहा तुह्मे आणवेध॥ उत्तिष्ठति॥ (१)

कामं॥ सदयं वीक्ष्य॥ वत्से मदयन्तिके;

मद। किं आणवेध?

कामं। अपेसरीभवेति।

मद। अवहिदम्हि। (२)

सवं। सहि पसीद; विरम एत्तो अत्तणवावादणादो, मा एदं जणं विसुमरेसि (३)

मद॥ सकोपमिव॥ अवेहि, णत्थि दे वसम्वदा (४)

कामं॥ सगतं॥ हन्त निश्चितं वराकया।

मद॥ सगतं॥ णाह मअरंद, णमो दे णमो (५)।

---

(१) यथा यूयमाज्ञापयत।

(२) अवहितास्मि।

(३) सखि प्रसीद; विरम एतस्मादात्मनोव्यापादनात्; मैनं जनं विस्मरिष्यसि।

(४) अपेहि, नास्ति ते वशम्वदा।

(५) नाथ मकरन्द, नमस्ते नमः।

Digitized by Google

लवं। भगवदि, अयंखेव मधुमदीखोत्तसन्दाणिअपवित्त मेहलो महीहरविअडो (१)

कामं। कृतमिदानीं प्रस्तुताभरणेन॥ सर्व्वाः पतितुमिच्छन्ति॥

नेपथ्ये। आस्वर्य्यमाश्चर्य्यं।

व्यतिकरदव भीमश्यामलोवेद्युतस्य

क्षणमुपहतचक्षुर्वृत्तिरुद्भूय मात्रः।

कामं॥ विलोक्य॥ साद्भुतहर्षं॥

॥ पुनर्नेपथ्ये॥ कथमिह न वयस्खल्किमेतत्

॥ प्रविश्य॥ मकरन्दः। किमन्यत्;

प्रभवति हि महिमा खेन योगेश्वरीयं।

नेपथ्ये। कथमतिदारुणो जनसमर्त्तोवर्त्तते।

मालत्यपायमधिगम्य विरक्तचेताः

सांसारिकेषु विषयेषु च जीवितेषु,

निश्चित्य वह्निपतनाय, सुवर्णविन्दु

मभ्येति भूरिवसुरित्यधुना हताः स्मः।

मद। लवङ्गिके, मालदीमाहवाणं दंसणमङ्गलवो अत्ति अवाहिदं अ (२)

---

(१) भगवति, अयमेव मधुमतीस्रोतःसन्दानितपवित्र मेखलो महीधरविटङ्कः।

(२) मालतीमाधवयोः संदर्शनमङ्गलवो अटित्वत्याहितञ्च।

Digitized by Google

कामन्दकीमकरन्दौ ॥ सहर्षं ॥ हा धिक्कष्टमाश्चर्यमाश्चर्यं।

किमयमसिपत्रवन्हेरसहटासारयोर्युगपदवपातः,
अनलस्फुलिङ्गकलितः किमयमनभ्रः सुधावर्षः,
सञ्जीवनौषधिविषव्यतिकरमालोकतिमिरसंभेदं,
अथ विधिरग्निप्रधरमधूरसमङ्गलमनुकुरुते।

नेपथ्ये। हा तात विरम; दर्शनोत्सुकाक्षि ते वदनकमलस्य; प्रसीद, सम्भावेहि मं, कथं मम कारणादो समत्थलोआ अन्तरालविक्खादणिम्मलकुलेक्कमङ्गलपदीवभूदं अत्ताणअं परिच्चअसि; मए उण अवच्चाए णिरणुक्कोसा तुम्हेत्ति सम्भाविदं आसि। (१)

कामं। हा वत्से, जन्मान्तरादपि पुनः कथमपि लभ्यसि, भीरु, यावदयं उपरागदुष्ट अग्निकलां कवलयितुमुपस्थितोऽनर्थः।

लवं। पित्रसहि!

॥ ततः प्रविशति प्रमुग्धां मालतीं धारयन्माधवः।

माध। कष्टं भोः कष्टं!

---

(१) हा तात विरम; दर्शनोत्सुकाक्षि ते वदनकमलस्य प्रसीद संभावय मां। कथं मम कारणात् समस्तलोका अन्तरालविजृम्भमाणनिर्मलकुलैकमङ्गलप्रदीपभूतमात्मानं परित्यजसि मया पुनरनर्थका निरनुक्रोशा यूयमिति सम्भावितमासीत्।

Digitized by Google

एषा प्रवासं कथमप्यतीत्य, धाता पुनः संगमयत्वयैव;
का नाम पाकाभिमुखस्य जन्तुर्दाराणि दैवस्य विधातुमीष्टे।

मक०॥ सहसोपसृत्य माधवं प्रति॥ सखे, अथ सा योगिनी क्व।

माध०। श्रीपर्व्वताद्दक्षिणसागरमापतितस्यैव मम सद्यः कण्ठवनेश्वरवचनादनन्तरं तां न पश्यामि।

कामन्दकीमकरन्दौ ॥ सप्रणयमाकाशे॥ महाभागे, पुनस्त्वायत्तं; किमर्थमन्तर्हितासि।

मदयन्तिकाजवनिके। यहि मालदि; णं मणामि मालदि त्ति॥ सोत्कण्ठं॥ भगवदि परिचाहि; चिरणिरुद्धणीसासणीप्फुरं से हिअअं। हा अमच्च, हा पिअसहि, दुवेवि तुह्मे परप्परावसाणस्स कारणं जादो (१)

कामं। हा वत्से मालति।

माध०। हा प्रिये।

---

(१) यहि मालति; ननु मणामि यहि मालतीति। भगवति परित्रायस्व,परित्रायस्व;चिरनिरुद्धनिश्वासनिःस्फुरमस्या हृदयं। हा अमात्य, हा प्रियसखि, द्वावपि युवां परस्परावसानस्य कारणतां यातौ।

Digitized by Google

मक० । हा प्रियसखि ॥ सर्व्वे मोहमुपगत्य संज्ञां लभन्ते ॥

कामं ॥ ऊर्ध्वमवलोक्य ॥ तत्किमेष घटिति पाचयमानादिवा मुदादम्बुनिवहः परिस्रवन्नस्मान्प्रीणाति ।

माध ॥ सोच्छ्वासं ॥ अये प्रत्यापन्नचेतना मालती । तथा ह्यस्याः, ।

भवति विततश्वासा, नासा प्रसन्नपयोधरं,
हृदयमपि च स्निग्धं, चक्षुर्निजप्रकृतौ स्थितं;
तदनु वदनं मूर्छाखेदान्मसादि विराजते,
परिगतमिवप्रारम्भेऽङ्गैः श्रिया सरघीरुहं ।

॥ नेपथ्ये ॥

अविगणय्य नृपं सहनन्दनञ्चरणयोर्नतमग्निमुखे पतन्,
सपदि भूरिवसुर्व्विनिवर्त्तितो मम गिरा गुरुसम्भ्रमविस्मयः ।

माधवमकरन्दौ ॥ ऊर्ध्वमवलोक्य सविस्मयं ॥ भगवति, दिष्ट्या वर्द्धसे ।

साधोगिन्यमरतो विघटितजटाभ्युपेत्यैवं यशाः
वागमृतजलासारो, जगदजलासारमतिग्नेते ।

कामं । प्रियं नः प्रियं ।

मालत्यादयः । दिष्ट्या पचुम्बीविदङ्ग । (१)

कामं ॥ सहर्षं सवाष्पञ्च ॥ एह्येहि पुत्रि ।

माल ॥ कथं भगवती ॥ पादयोः पतति ॥

Digitized by Google

कामं। उत्थाप्यालिङ्ग्य मूर्द्धन्याघ्राय।

हृद्धि जीवितसमाश्वास, जीवितं देहि, जीवतु सुहृज्जनस्य ते;
अकृतैस्तुहिनसङ्कीर्णतलैः, पुनि, मां प्रियसखीञ्च जीवय।

माध। वत्स मकरन्द, संप्रत्युपादेयो जीवलोकः संवृत्तः।

मक॥ सहर्षं॥ एवमेतत्।

मदयन्तिका सवक्त्रिके। पिअसहि, मणोरहाणदिट्ठदंसणेण सम्भावेहि अम्हे परिसङ्केण (१)

माल। हा पिअसहिओ॥ उभे आलिङ्गति॥ (२)

कामं। वत्सौ किमेतत्।

माधवमकरन्दौ। भगवति;

कपालकुण्डलाकोपदुर्जातजनितापदः,
वयमप्युद्धृताः क्षुद्रात् निर्व्वन्धादार्य्ययानया।

कामं। कथमघोरघण्टबन्धविजृम्भितमेतत्।

मद। सवक्त्रिके, अहो अच्छरीअं पुणरुत्तदारुणस्स परिणामरमणीअं विहिणो विलसिदं।

॥ प्रविश्य सौदामिनी ॥ उपसृत्य ॥ भगवति कामन्दकि, सएष वत्सिरत्नमोऽन्वेषाभिजनः प्रणमति।

---

(१) मनोरथातिदृत्तदर्शनेन सम्भावयास्मान् परिष्वङ्गेन।

(२) हा प्रियसख्यौ।

(३) अहो आश्चर्यमाश्चर्यं, पुनरुक्तदारुणस्य परिणाम रमणीयं विधेर्विलसितं।

Digitized by Google

कामं। अये भद्रा सौदामिनी।

माधवमकरन्दौ॥ सविस्मयं॥ कथमियं भगवत्याः पक्षपात स्थानं आद्या शिष्या सौदामिनी; तत्सर्व्वमधुना सङ्गच्छते।

कामं। एह्येहि भूरिवसुजीवितदानपुण्य
संभारधारिणि, चिराय मयापि दृष्टा;
दत्तप्रमोदमपि नन्दय मे शरीर
मालिङ्ग, सौहृदनिधे, विरम प्रणामात्।

अपिच। वन्द्या त्वमेव जगतां स्पृहणीयसिद्धि
रेवंविधैर्विलसितैरतिबोधसत्वैः;
यस्याः पुरा परिचयप्रतिबद्धबीज
मुद्भूतभूरिफलशालिविजृम्भितं ते।

मदयन्तिका सवक्रिके। इयं सा आर्य्या सौदामिणी। (१)

माल। वाढं इमाए खु भअवदीपक्खवादिणीए, णिअ छिअ कवाकुण्डलं अत्तणो अवसधं उवणीअ, संभअवदो निव्वि सेसं समाराधिदाहि; किञ्च केसरावल्लीअहिज्ञाणहत्थाए दूह आगन्तूण, सव्वे संधारिदा मरणादो, सा एसा जीविदप्पदा दूणी सौदामिणी। (२)

मदयन्तिका सवक्रिके। सुप्पसण्णा णः कणिट्ठा भअवदी। (३)

---

(१) इयं सा आर्य्या सौदामिनी।

(२) अनया खलु भगवतो पक्षपातिन्या, निर्भर्त्स्य कपाल कुण्डलामात्मनोऽवसथमुपनीय, भगवतोनिर्व्विशेषं समाराधिताऽसि; किञ्च केसरावल्यभिज्ञानहस्तया दूरागत्य सर्व्वे सन्धारिता मरणात् सैषा जीवित प्रदायिनी सौदामिनी।

(३) सुप्रसन्ना नः कनिष्ठा भगवती।

Digitized by Google

माधवमकरन्दौ। अहो नु खलु भोः।

अपि चिन्तामणिश्चिन्तापरिश्रममपेक्षते,

दृढं लब्धतमन्येन कृतार्थ्यमधिचिन्तितं।

सौदा॥ खगतं॥ हन्त खण्डयति मामेवं सौजन्यमेषा,

॥ प्रकाशं। भगवति, एतत्प्रहृष्टनन्दनाधिनंदितेन राज्ञा पद्मावतीश्वरेण, भूरिवसोः प्रत्यक्षमभिलिख्यायुष्मतो माधवस्य प्रेषितं लेखपत्रमर्पयति।

कामं॥ गृहीत्वा वाचयति॥ खल्वस्तु वः; परमेश्वरः समाज्ञापयति। यथा।

साध्यानां गुणिनां धुरि स्खलितवति, श्रेष्ठाग्र्येऽपि त्वयि

प्रत्यक्षव्यसने महीयसि, परं प्रीतोऽस्मि जामातरि;

तेनेयं मदयन्तिकाद्य भवतः प्रीत्यै तव प्रेयसे

मित्राय प्रथमानुरागघटिताप्यस्माभिरुत्सृज्यते।

॥ माधवमुद्धिश्य॥ वत्स, श्रूयतां।

माध। श्रुतमिदानीं, सर्वतः कृतार्थोऽस्मि।

माल। दिट्ठिआ गदं णेहिअअस्स असङ्काअत्तं। (१।

सवं। संपदं निरवसेसं माहवसिरिणो मालदीए समं फलिदा मणोरहा (२)

---

(१) दिष्ट्या दृढानीमपहृतं नोहृदयस्याशङ्काग्रस्तं।

(२) सांप्रतं निरवशेषं श्रीमाधवस्य मालत्याश्च समं फलितामनोरथाः।

Digitized by Google

मक ॥ परोऽवलोक्य ॥ कथमवलोकितावुद्भूरचिते कलहंस केन सह प्रमोदं नृत्यन्त्यावित एवागच्छतः।

ततः प्रविशतोऽवलोकितावुद्भूरचिते कलहंसस्य ॥ विविधं नृत्यं कृत्वा सर्व्वे उपसृत्य सप्रणामं कामन्दकीं प्रति ॥ अज्ज भअवदि कज्जणिहाणे ॥ माधवं प्रति ॥ अज्ज मअरंद णंदण माहव पुण्णचन्द दिट्ठिआ वड्ढसि (१) ॥ सहर्षं सर्व्वे सस्मितं पश्यन्ति ॥

लवं। को वा इमस्मिं परिपुरिदसव्वमङ्गलवे ण णच्चदि। (२)

कामं। एवमेतत् अस्ति वा कुतस्त्यिदेवंभूतं विधिचरमणीयोज्ज्वलं महाप्रकरणं।

सौदा। इदमत्र रमणीयान्तरं यदमात्यथोर्भूरिवसुदेवरातयोस्त्रिरात्पूर्णोऽयमितरेतरापत्यसम्बन्धान्मनोरथः।

माल ॥ खगतं ॥ कथंविध। (३)

माधवमकरन्दौ ॥ सकौतुकं ॥ भगवति, अन्यथा वस्तुदृष्टम न्यथा वक्तुमार्य्यायाः।

---

(१) अयि भगवति कार्य्यनिधाने। अयि मकरन्दनन्दन माधव पूर्णचन्द्र दिष्ट्या वर्द्धसे।

(२) कोवा अस्मिन् परिपूरितसर्व्वप्रकारमहोत्सवे न नृत्यति।

(३) कथमिव।

Digitized by Google

सवं ॥ अगाधिकं ॥ भगवति किं एत्थ पत्तिवत्तिदव्वं (१)

कामं। संप्रति मदयन्तिकायामन्यात् नन्दनोपयाचितत्व लाभङ्गाः खलु वयं ॥ प्रकामं ॥ वत्सौ, न खल्वन्यथा वस्तुवृत्तं, यतः आवकावस्थायामस्मत्सौहार्दामिनीप्रत्यक्षमवयोर्दृष्टेयं प्रतिज्ञा अवश्यमावाभ्यामपत्यसंबन्धः कर्त्तव्यइति, प्रधानप्रकृतिको पक्षेवं प्रतिहतः।

माल। अहो संवरणं।

॥ माधवमकरन्दौ ॥ आश्चर्यं ॥ अवन्ति महतामविसंवादसुखप्रसा पिण्डः कल्याणिन्यो नीतयः।

कामं। वत्स माधव।

यत्प्रागेव मनोरथैरतिमभूत्कल्याणमायुष्मते
तत्पुण्यैर्मदुपक्रमैश्च फलितं क्षेत्रेऽपि मच्चिक्षयोः;
निष्णातस्य समागमस्य विहितस्तत्रेश्वरः कामया
संप्रीतौ नृपनन्दनौ, किमपरं श्रेयस्तदप्युच्यतां।

---

(१) भगवति किमत्र प्रत्येतव्यं।

Digitized by Google

माध ॥ सहर्षं प्रणमति ॥ भगवति अतोऽपि परमं प्रिय मस्ति; तथापीदमस्तु, भगवतीप्रसादात्।

सन्तः सन्तु निरन्तरं सुकृतिनो विध्वस्तपापोदयाः;
राजानः परिपालयन्तु वसुधां धर्मे स्थिताः सर्व्वदा;
काले सन्ततवर्षिणोजलमुचः सन्तु स्थिराः पुण्यतो;
मोदन्तां धनबन्धुबान्धवसुहृल्लोष्ठीप्रमोदाः प्रजाः।

एवमस्तु।

इति निष्क्रान्ताः सर्व्वे ॥ मालतीमाधवे दशमोऽङ्कः।

॥ समाप्तं चेदं मालतीमाधवनाटकं॥

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google



Digitized by Google